M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 17

Title: Kala Nirnaya Siddhant With Com.

Complete

		Kālanirṇayasiddhānta with Com.	Title
		Mahadevavit	Author
		Com. by Raghurama	Editor
		1709 - 1710	Year, Vols.
			Publisher
17			Remarks

॥ का॰ सि॰ टी॰ ॥ श्रीगणेशाय नमः ॥ ॥ प्रणम्यैकरदं देवं सारदां गुरुमेव च ॥ कालनिर्णयसिद्धान्तं व्याकुर्वे वि-
१ शदोक्तितः ॥१॥ प्राज्ञैराद्यैर्हृद्यपद्यैर्निबंधाः कृप्ता नानावेदशास्त्रार्थवित्तैः ॥ आलक्ष्यंते ते स्वयं संदर्शना-
र्थं दीपाकारा मे कृतिः पुंसः कस्य ॥२॥ जानंति सूरयः सुभूरिविद्यास्तेषां निमित्तेन ममैष यत्नः ॥ उत्पत्स्यते मत्स-
दृशोपि कश्चित्कालो ह्ययं नंतो विपुला धरित्री ॥३॥ ॥ अथ ग्रंथाकर्त्ता ख्यानीशं प्रतिजानीते ॥ ॥ अहं का-
लनिर्णयसिद्धान्तं ग्रंथं वक्ष्ये इत्यन्वयः ॥ कालः परापरव्यतिकरयौगपद्यायौगपद्यचिरक्षिप्रप्रत्यय- राम॰
लिंगः तेषां विषयेषु पूर्वप्रत्ययविलक्षणानामुत्पत्त्यावस्य निमित्तासंभवाद्यत्तन्निमित्तं स काल इति
सर्वकार्याणां चोत्पत्तिस्थितिविनाशहेतुः ॥ तद्यदेशात् क्षणलवनिमेषकाष्ठाकलामुहूर्त्तयामाहो- १
रात्रार्द्धमासमासर्त्वयनसंवत्सरयुगकल्पमन्वंतरप्रलयमहाप्रलयव्यवहारहेतुः तद्वयवादि व-
सपक्षमासर्त्वयनाद्यास्तेषां निर्णयः तत्तत्कालविहिताचरणनिश्चयः कालनिर्णयः तस्य
सिद्धांतो यस्मिन् तं ॥ किं कृत्वा ॥

शिवं सच्चिदानंदरूपं परमात्मानं नत्वा ॥ तं विशिनष्टि ॥ कालतनुं उत्पद्यमानो नाद्यंतवान् सर्वो-
त्पत्तिमतां निमित्तकारणं कालः स एव तनुः शरीरं यस्येति ॥ कालतनुः परमात्मेत्युत्पलेनोक्तं ॥ कालः
सृजति भूतानि कालः संहरति प्रजाः ॥ कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ॥ कालेन बलिरिंद्रो-
भूत् कालेन च निवर्त्तते ॥ कालएव पुनः कर्त्ता पुराण्यान्येव भूविरि ॥ इति शास्त्रे कालस्वरूपत्वं ॥ किमर्थं वि-
पश्चित्कृततुष्ट्यै विशेषेणापश्यंति श्चित्येत्यर्थमिति विपश्चितः तएव जनास्तेषां तुष्टये संतोषाय ॥

॥ श्रीगणेशाय नमः ॥ ॥ शिवं कालतनुं नत्वा विपश्चित्कृततु-
ष्टये ॥ कालनिर्णयसिद्धान्तं वक्ष्ये ग्रंथानुसारतः ॥ १ ॥ ॥ ॥

विपश्चितोपि प्रबंधसाध्यं ग्रंथेषु तुष्टिमप्यनियतत्वात् ... विविचित्र नंतिरनिमेनत प्रसिद्धोक्तिपाल-
श्चीवाप्यसमाने देवसुधिया कार्यप्रकारोतनं ॥ इति ॥ स्वकृतिनत्वं निराकुर्वन्नाह ॥ कथं ॥ ग्रंथानुसारतः ॥ ग्रंथा
माधवाचार्येरामचंद्राचार्यैः रघुनाथवानपेयिप्रनंतरपिनानिबंधास्तेषामतानुसरणेन तरतिन ग्राह्योप्यपि
श्चर्वाचीनैः कालमानेन ग्राह्यदेवं तिबंधुप्रसंसोरेदवसावनमानयनेदेनवनेदेननवधोक्तेनत्रैव बहुतयेकाला-
वयवा नेतदिवस ... तोना चानुर्विध्यमाह ॥ २ ॥

का·सिं·टी· दिवसाश्च परं मासाश्चतुर्द्धेति शेषः। तत्प्रकारमाह। सौरार्क्षेंदुसावनाः। संक्रमात् खत्र्यंशात्रिंशत्तमो
भागः सौरो दिवसः। संक्रमादित्यत्र संक्रांते राशिमानात् त्रिंशत्तमो भागो नाममितत्वात्। न तु संक्रांत्यवच्छिन्न
२ सावनदिनानां त्रिंशत्तमो भागः। त्रिंशद्भिः सौरैकराशिरित्यक्रमेणोत्पद्यतः। चंद्राधिष्ठितनक्षत्रावच्छिन्नो
दिवस आर्क्षः ऋक्षसंबंधी दिवसः। तिथिरप्यमितः तिथिकालावच्छिन्नश्चांद्रो दिवसः। व्योमांगनाड्यः षष्टि
घटिकास्तन्मितः सावनो दिवसः। तथा चोक्तं विष्णुधर्मोत्तरे। तिथिनैकेन दिवसश्चांद्रमानेन कीर्तितः

सौरार्क्षेंदुसावनाश्च दिवसा मासा रवेः संक्रमात् खत्र्यंशमितस्तिथिप्रमितिर्व्योमांगनाडीमितः॥ राम·

अहोरात्रेण चैकेन सावनो दिवसः स्मृतः। आदित्यराशिभोगेन सौरो दिवस उच्यते। चंद्रनक्षत्रयोगेन २
नाक्षत्रो दिवसः स्मृत इति। मासाश्चतुर्विधाः सौरार्क्षेंदुसावना इति। संक्रांत्या राशिभोगेन सौरो
मासः। इंदोरश्विन्याद्यश्विन्यंतनिरूक्षात्यतिथीनां भोगक्रमेणानेन नाक्षत्रो मासो भवति। दर्शांत
तोऽमादर्शांतावधिश्चांद्रो मासः। खाग्निभिर्मितान्यहानि वारा यस्मिन् स खाग्न्यहः सावनमासो भवति॥

तथा चोक्तं विष्णुधर्मोत्तरे। प्रथमः सावनो मासो द्वितीयश्चांद्र उच्यते। नाक्षत्रस्तु तृतीयः स्यात् सौरो
मासश्चतुर्थकः स्मृतः। तथा च स्मृतिः। शास्त्रे दर्शावधिं मासमुशंति चांद्रं सौरं तथा भास्कर राशिचारा
त्। त्रिंशद्दिनं सावनसंज्ञमार्या नाक्षत्रमिंदोर्भगणाच्च मासमिति। अस्य त्वापि। चांद्रः शुक्लादिदर्शांतः सावनस्त्रिं
शतादिनैः। एकराशौ रविर्यावत् कालं मासः स भास्करः। सर्वर्क्षपरिवर्तैस्तु नाक्षत्रो मास उच्यत इति। स चांद्रो मासो
द्विधा शुक्लप्रतिपदादिदर्शांतावधिरेकः। कृष्णप्रतिपदादिपूर्णिमांतमपरः। अपेतु कृष्णादि मासो विंध्या

संक्रान्त्या दक्षिणे देशे न तावत् ग्राह्यो दर्शावधिः स्वाग्रहश्चांद्रो दो सितपक्षतोऽसितदलादिर्ध्याध्यपाउ नेष्य
ते॥२॥

दैरपाकदक्षिणापदेशे नेष्यते। नाद्रियते। तथा च त्रिकांडमंडनः। चांद्रोऽपि शुक्लपक्षादिः कृष्णो
दर्शांत इति मदुद्धा कृष्णपक्षादिकं मानं नांगीकुर्वंति केचन। ये पि कुर्वन्ति तेषामपि विंध्यस्य दक्षिणे विंध्यस्य
दक्षिणोऽपि कृष्णपक्षादिर्न गच्छंति तेषामपि तदा दिशि मासज्ञता दृढा नेति। कालनिर्णये माधवेनाप्युक्तं ता
नि तु स्मार्तानि तराच नयोऽस्य पूर्वः। ऋतुमेरमाह॥२॥

का॰सि॰टी॰ सौरश्चांद्र इति ऋतुर्द्विधा। तथा च त्रिकांडमंडनः। श्रौतस्मार्तक्रियाः सर्वाः कुर्याच्चांद्रेषु चर्तुषु। तदभावे
३ तु सौरेष्वेविति ज्योतिर्विदामतं मिति। तत्रापि सौरो द्विधा। क्रियान्मेषात्तद्द्विः संक्रमणकः। तिमिर्मीनस्त
न्मुखात्तदाद्द्विसंक्रमः परः। वसंत इति तद्दतु प्रवृत्तिर्वसंततः। मुखं चाग्रतनं तूनावसंत इति श्रुतेः॥
मेषवृषौ वसंत इत्याद्यः। मीनमेषौ वसंत इत्यादित्यपरः। चांद्रचैत्रवैशाखाभ्यां वसंत इति चांद्रऋतुः

सौरश्चांद्रऋतुः क्रियात्तिमिमुखात्तद्द्विः संक्रमश्चैत्रतो। द्विर्मा
सश्च वसंततोयनउदक्याम्यं मृगात्कर्कतः॥ ॥ ॥ राम

मधुश्च माधवश्च वासंतिकावृतू इति श्रुतेः॥ एवं द्विमासिका वसंताद्याः षड् ऋतवो भवंति। ज्योतिः ३
शास्त्रेपि। मृगादिराशिद्वयभानुभोगात् षडर्तवः स्युः शिशिरो वसंतः। ग्रीष्मश्च वर्षाश्च शरच्च तद्व
मंतनामा कथितोत्र षष्ठ इति। मृगात्मकरात्। कर्कात् उदक्याम्ये अयने भवतः। अयने तु सौरे
एव। शिशिराद्यृतुत्रये उत्तरायणं। वर्षाद्यृतुत्रये याम्यायनं। तथा च ज्योतिःशास्त्रे॥ ॥ ॥

शिशिरपूर्वमृतुत्रयमुत्तरं ह्ययनमाहुरहश्च तदामरं। भवति दक्षिणमन्यदृतुत्रयं निगदितारज
नी मरुतां च सेति। त्रिधाप्यमाह। विधुसप्तराम ३७१ तिथिभिश्चांद्रोब्दो भवति॥ नभोगाग्नित्रि ३६०
रं श्रौः सौराब्दः। पंचषड्ग्निभिः सांघ्रिभि ३६५। १५ दिवसैः सावनोब्दः। अब्दस्त्रिविध एव। तथा च ब्रह्म
सिद्धांते। चांद्रसावनसौराणां मासानां च प्रभेदतः चांद्रसावनसौराख्यास्त्रयः संवत्सरा अपीति॥

चांद्रोब्दो विधुसप्तरामतिथिभिः सौरो नभोगाग्निभि॥
र्भोगैः पंचषडग्निभिः स च रवौ रश्मिर्भवेत्सावनः॥३॥

तेष्वब्दत्रयं भवति। द्वादशमासात्मकः। द्वादशमासाः संवत्सर इति श्रुतेः॥ चांद्रोब्दः कदाचित्
त्रयोदशमासात्मको भवति। त्रयोदशमासाः संवत्सर इति श्रुतेश्च॥३॥ इति कालनिर्णयसि
द्धांते दिनादिवत्सरांतनिर्णयः॥ अथ मासादिके कृत्यमाह॥ ३॥ ॥ श्री॥ ॥

का॰सि॰टी॰ विप्राणां विशां च चांद्रो मास उक्तः। यत्र मासनियमो नोक्तस्तत्रापि चांद्रः पित्र्ये कार्येऽपि चांद्र एव। त
था चोक्तं ब्रह्मसिद्धांते। अमावास्यापरिछिन्नो मासः स्याच्चांद्रमसस्तु। संक्रांतिपौर्णमासीन्यात त
४ पैवनृपवैश्ययोरिति॥ विवाहविचारे सौरः क्षत्रियाणामपि सौर उक्तः। तथा च केशवार्कः॥ प्रायः
सौरमानमिष्टं विवाहे इति॥ सूतकविधावाशौचे कृच्छ्रेषु प्राजापत्यचांद्रायणादिषु॥ ओषधेन्नेष

चांद्रो विप्रविशामनुक्तविषयेऽपि स्यात् वैवाहिके॥ राम
सौरः क्षत्रनृणां च सूतकविधौ कृच्छ्रौषधे सावनः॥

सावने सावनः प्रोक्तः॥ नाड्यादौ घटीसाधना दौ न नवो नाक्षत्रः काल उक्तः। तथा च ज्योतिःशा ४
स्त्रे। वर्षायनर्तुयुगपूर्वकमत्र सौरान्मासास्तथा च तिथयस्तुहिनांशुमानात्। यत्कृच्छ्रसूतक
चिकित्सितवासराद्यं तत्सावनाच्च घटिकादिकमार्क्षमानात्। इति। अन्यत्रापि॥ ॥ ॥

सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृतः। आब्दिके पितृकार्ये च चांद्रो मासः प्रशस्यते इति। अथ य
नकल्पमाह। सौम्यायने विवाहः। सदनं गृहं जनो विष्णुस्तस्य स्थापप्रतिष्ठा तडागादिपदात् वापीकू
पतडाकप्रासादादिप्रतिष्ठा सर्गाः। एतदादिसत्कर्मविधेयं। तथा चोक्तं। देवतारामवाप्यादिप्रति
ष्ठोद्यानतरवौ। दक्षिणासंमुखे कुर्वन्न तत्फलमवाप्नुयात्। आदिशब्दात् विवाहादि मांगल्यं

॥नाड्यादौ च भवो विवाहसदनाजास्थादि सौम्यायने॥
॥याम्ये मातृवराहभैरववनसिंहो वा बलिभुक् स्थिति॥

याम्ये याम्यायने मातरो गौर्यादयः भैरवा असितांगाद्याः वराहो यज्ञवराहः नृसिंहः अंबा महिष
मर्दिनी। बलिभुक् त्रिविक्रमः। बलं यज्ञे भुंक्ते इति बलिभुक्। एतेषां स्थितिः प्रतिष्ठा स्यात्। तथा
चोक्तं देवीपुराणे मातृभैरववाराहनारसिंहत्रिविक्रमाः। महिषासुरहंत्र्यश्च स्थाप्या वै दक्षिणायने इ
ति॥ मासायनकल्पं॥ ॥ अथ मलमासः॥ ॥

का॰सिं॰टी॰ सितमुखः शुक्लादिः चांद्रो मासः संक्रांत्या रहितोऽधिको मासो भवतीत्यर्थः। एकराशिस्थि
५ ते सूर्ये यदा दर्शद्वयं भवेत्। हव्यकव्यक्रियाहंता स भवेदधिमासकः। चांद्रो मासो य संक्रांति
र्मलमासः प्रकीर्तित इति॥ अथायं स संक्रांतिस्तस्य तुल्याङ्गविधायस्यैतस्य प्रमाणानामानव
ति। तदुक्तं ब्रह्मसिद्धांते। पश्चात्तु दिवसैर्मासः कथितो बादरायणैः। पूर्वमर्द्धं परित्यज्य कर्तव्या

संक्रांत्या रहितोऽधिकः सितमुखो मासश्चांद्रकोऽप्यान्विधः॥ राम॰
स्यान्मासैरदनैः सषोडशादिनैर्नाडीचतुष्कान्वितैः॥ ॥ ५

चोत्तरे क्रियेति वचनात्परनामाद्यस्यापि। स एकस्मादधिमासात्परोऽधिकमासो रदैर्द्वात्रिंशन्मा
सैः षोडशाभिर्दिनैः घटीचतुष्कसहितैः समायाति। तथा चोक्तं वसिष्ठसिद्धांते। द्वात्रिंशद्भिर्गते
र्मासैर्दिनैः षोडशभिस्तथा। घटिकानां चतुष्केण पतत्यधिकमासकः। अथ क्षयमासः॥ ॥

एकमासितरयोः सूर्यस्य संक्रांतियुग्मात् क्षयमासो भवति। यदा कार्तिकादिमासत्रये एक
स्मिन् मासे संक्रांतियुग्मं भवति सक्षयाख्यः स्यात्। एतदुक्तं भवति। चेत्कार्तिके संक्रांतिद्वयं
भवति। तदा कार्तिकस्य क्षयः समार्गशीर्षनामा भवति। तत्र क्षयमासात्परः पुरोऽधिमासद्व

॥पूर्वस्मात्पर एकमासितरयोः संक्रांतियुग्मात्क्षयो॥
॥मासः कार्तिकतस्त्रये परपुरस्तत्राधिमासद्वयं॥५॥

यं भवति। चैत्रादिषट्के एकः। आश्विनादिषट्के परः। स कदाचिद्भवति। तदुक्तं सिद्धांतशि
रोमणौ॥ असंक्रांतिमासोऽधिमासः स्फुटः स्याद्विसंक्रांतिमासः क्षयाख्यः कदाचित्। क्ष
यः कार्तिकादित्रये नान्यतः स्यात्तदा वर्षमध्येऽधिमासद्वयं चेति। तस्मे भवार्थमाह॥५॥ ॥

का॰सि॰टी॰ तत्संनत्वार्यमाह॥ तस्य क्षयमासस्य संभवः एकयुगे दुनिरं १४१ वर्षैः क्वचित्सवकुनिः १९ वर्षैः
:प्रोक्तः॥ तदुक्तं सिद्धांतशिरोमणौ। गतोब्धिद्वितैदे १७४ मिते शाककालेतिथीशै ११२५ र्भवि
६ ष्यत्यथांगाक्षसूर्यैः ११५६। नगांकाग्निचंद्रमि १३९७ स्तथा प्रायशोयं कुवेदेंदुवर्षैः १४१ क्वचि

वर्षैरेकयुगे दुनिरं १४१ र्नवकुनि १९ स्तत्संभवोत्रादिमः॥ राम
संसर्पोधिकमासः क्षयाख्यनुदितश्चांहस्पतिश्चाधिकः॥ ६

अंहोकुनि १९ श्चेति। क्षयमासयुक्ते वर्षे य आदिमोधिकमासः संसर्पाख्यः क्षयस्य नामजंहह
स्पतिः। पाश्चात्योधिकमास एव। तदुक्तं। यस्मिन्मासे न संक्रांतिः संक्रांतिद्वयमेव वा॥ संस
र्पांहस्पती मासावधिमासश्च निंदिताः। बहुवचनेन त्रयं त्याज्यं॥ ॥७॥ ॥

एषु त्रिषु मासेषु देवगृहादिक्षौरविवाहयागोत्सवान्। तथा चोक्तं ज्योतिःशास्त्रे। एकवर्षमध्ये
धिकमासयुग्मे तत्कार्त्तिकादित्रितये क्षयाख्ये॥ मासत्रयं स्यात्स्यमिदं प्रयत्नाद्विवाहयज्ञो
त्सवमंगलेषु॥ मंगलग्रहे नक्षौरोपनयनादित्याज्यं॥ आद्यक्षितये। संसर्पाख्ये हस्पत्यो मास

पाश्चात्यास्त्रिषु नेषु देवसदनक्षौरोद्वहेष्वुत्सवाः॥
प्रोक्ता द्यक्षितयस्मृतीरितपितृश्रौताश्रितास्तक्रिया॥६

योःस्यसुन्कपि तत्कार्याश्रितश्रौतासतक्रियान्नचसेव। तथा च नावालिः॥ मासद्वयेश्च मध्ये
तुसंक्रांतिर्नयदान्नचेन्नस्तत्र तुपूर्वः स्यादधिमासस्तयोत्तर इति। अन्यच्च ज्योतिःशास्त्रे॥
एकत्र मासक्षितयं यदि स्याद्वर्षेधिकं तत्र पराधिमासः त्रयोदशो तु श्रुतिराह वेदे चतुर्दशाः
क्वापि न चात्र दृष्टः। इति॥ ६॥ ॥

का॰सिं॰टी॰ मलमासे कृत्यमाह ॥ ॥ अधिके मासे त्रिंशो गर्भाधानादि अन्नप्राशनांताः क्रियाः संस्का
७ रान्विततनुयात् । तथा च काठकगृह्यपरिशिष्टे यवक्रीहितिलेहैं जातकर्मादिका क्रिया ॥
अनन्यगतिकत्वेन कर्त्तव्यं स्यान्मलिम्लुचे इति ॥ गर्भाधानादिकाः सर्वाः प्राशनांताश्च याः

गर्भाधानमुखाः क्रियाविततनुयादन्नाशनांताः शिशोः ॥
स्तन्नांदीमुखयागमिष्टतपनग्रासोत्सवानाश्रवौ ॥ ॥ राम॰

सर्वा मलिम्लुचे कार्या रत्यस्यन्नापि । तन्निमित्ते जातकर्मादि प्राशनांतकर्मनिमित्तं ७
वृद्धिश्राद्धं । चंद्रसूर्यग्रहणे स्नानदानादि श्राद्धं च ॥ तथा चोक्तं । चंद्रसूर्यग्रहे चैव मरणे
पुत्रजन्मनि ॥ मलमासेपि देयं स्यात्सत्त्वं दत्तमक्षयमिति ॥ ॥ छ ॥ ॥ ॥

मृतस्य दाहादितः प्रथमाब्दिकांताः क्रियाः वितनुयात् । तथा च काठकगृह्ये । प्रेतमासादिमा
सस्य श्राद्धपिंडोदकक्रियाः ॥ सपिंडीकरणांताश्च यथाकालमुपस्थिताः ॥ मघात्रयोदशी
श्राद्धं प्रत्युपस्थितिहेतुकं ॥ अनन्यगतिकत्वेन कर्त्तव्यं स्यान्मलिम्लुचे इति । पातोव्यती

तच्छ्राद्धं मृतकस्य दाहविधिनो मुख्याब्दिकांताः क्रियाः ॥
पाता मापितृनत्रयोदशतिथिश्राद्धं गजच्छायिकं ॥ ७ ॥ ॥

पातः ॥ अमादर्शः पितृने मघा ॥ त्रयोदशातिथिश्राद्धं त्रयोदशीश्राद्धं । गजच्छायाजवं श्रा
द्धं च कुर्यात् । तथा च बृहस्पतिः । नित्ये नैमित्तिके कुर्यात्प्रयतः सन्मलिम्लुचे तीर्थे श्राद्धं गजच्छायां प्रे
तश्राद्धं तथैव च इति । नित्यं व्यतिपातदर्शादि श्राद्धं । नैमित्तिकं मघागजच्छायादि । शेषं स्पष्टं ॥ ७ ॥

का॰ति॰दी॰ अन्यदप्याह॥ संध्योपासनं। श्रौतस्मार्त्तसायंप्रातर्होमं वैश्वदेवपिंडपितृयज्ञादिदर्श
८ पौर्णमासेष्टिचरुप्रांताः। क्रियाः मलिम्लुचेकुर्यात्। नित्यनैमित्तिकेकुर्यादित्यादिबृहस्पति
वचनं प्राक्लिखितं॥ अन्यच्च। अवषट्कारहोमाश्चपर्वचाग्रयणं तथा॥ मलमासेचक
र्त्तव्यं काम्याइष्टीश्चवर्जयेत्। अवषट्कारहोमानित्यहोमादयो वैश्वदेवपिंडपितृयज्ञाद

संध्यावंदनमग्निहोत्रमुखतोमायौर्णमासक्रियाः॥ राम॰
प्रायश्चित्तमिहोत्थितेचपुनराधानेतथापत्रिषु॥

८

यः। पर्वत्रादेनदर्शपौर्णमासौस्थालीपाकौ। आग्रयणंदुर्भिक्षे। मलमासेपिकर्त्तव्यमिति॥
दुर्भिक्षेआग्रयणेष्टिकरणं जीर्णान्नानावान्नयान्नप्राप्तौ तत्करणोत्तरतनक्षणेनप्रायारक्ष
णमितिदृष्टार्थं। इहप्रायश्चित्तोत्पत्तौपुनराधानं। आपत्कालेआग्रयणंव्याख्यानदृष्टं। शुद्धमासिमृ
तस्यप्रथमाब्दिकं॥

तथाचवृद्धवसिष्ठः॥ असंक्रांतेपिकर्त्तव्यमाब्दिकंप्रथमंद्विजैः। तथैवमासिकंश्राद्धंसपिंडीकरणं त
थेति मलमासेमृतस्यापरमपिआब्दिकंकार्यं तथाचपैठीनसिः। मलमासमृतानांतुश्राद्धंयत्प्रतिव
त्सरं मलमासेतुकर्त्तव्यं नान्येषांतुकदाचनेति। अत्रमलमासेमृतस्यतुप्रथमाब्दिकंमलमासेन
सेनवति। परंतुकदाचित्त्रयोदशमासैर्वर्षः सगवमासो मलमासः स्यात्तदातत्रमलमासेतस्याब्दिकं। तरंक

नचान्येष्टिरथान्यमासिमृतकस्याब्दिकंचाधिके॥
नष्टस्यापरमाब्दिकंप्रथमतः श्राद्धंगयायांचरेत्॥८

र्त्तव्यमिति तात्पर्यार्थः। तदन्नाचेनुशुद्धेमासिविधेयं। प्रथमंगयाश्राद्धं सार्वकालिकं कुर्यात्। वायु
पुराणे। गयायांसर्वकालेषुपिंडंदद्याद्विचक्षणः। अधिमासेजन्मदिनेतथास्तेगुरुशुक्रयोः। नत्यक्त
व्यंगयाश्राद्धंसिंहस्थेचबृहस्पतौ। अत्रश्राद्धस्ययात्रापूर्वकत्वाद्यात्राप्रतिषिद्धेत्यर्थः। एतत्सर्वमल
मासेकुर्यादितिपर्यार्थः॥८॥

का॰सि॰दी॰ अन्यकृत्समाह॥ पाके सेष्टिः कारीर्यादीष्टिरधिमासेस्यात्। रोगार्त्तेनिमित्ते काम्यं जपहोमादि। मलमासा
१ न्यागे गः कृतश्रुद्धिश्च समाप्तिः स्यात्। तथा च काठकगृह्ये। प्रवृत्तं मलमासात्प्राक्यत्काम्यमसमापितं॥
आगते मलमासेपि तत्समाप्यमसंशयमिति। आतुरजनस्पर्शनादिसंस्पर्शग्रहणं च स्यात्। देवान्स्वर्णदृष्ट
तीर्थदेवतासेवनं। अयोनेन्तरं सामगद्विजातेः सिंहस्थे रवौ सति उपाकर्म श्रावणे। यत उक्तं। छंदोगपरिशि

पाके सेष्टिर्यामयार्त्तविषयं काम्यं पुरागं कृतप्रश्रूद्दिश्च तदूर्ण्नातातुरजनेर्दानादिसंस्पर्शसि॥
ता। प्राकदृष्टामरतीर्थसेवनमयोपाकर्मसिंहे रवौ छंदोगद्विजनेः कुसीदनचयःस्यान्निसृष्टर्पियो॥ राम

ष्टे। सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्ने विचरेद्बहिः। छंदोगामिलिताः कुर्युरुत्सर्गं सर्वछंदसामिति। सिंहे १
रवाविति नियमाद्वितीयारंभो न वत्स्येव। प्रथमारंभो न स्यादिति। कुसीदं कालांतरवृद्ध्या द्रव्यार्पणं।
तत्र च यो मासिकवृद्धिः स्यात्। निसृष्टार्पणं निसृष्टदानं। सत्रार्पणं सत्रदानं। एतत्सर्वं मलमासे स्यात्।
नव यमः। ग्रनेवाद्दुष्टिके न सप्रेतकर्मपि मासिके। सपिंडीकरणं नित्यं नाधिमासविवर्जयेत्। रति
गर्भाग्निसंस्कारे। वार्द्धुषिके कुसीदं च पैतृकं सेवेत न विद्याविति॥ २॥ ॥७॥ ॥

अन्यकृत्समाह॥ चातुर्मास्यनिमित्तं प्रारब्धव्रतविधिः एकनुक्तादिव्रतानि। युगादिविषयं।
श्राद्धं। दशहरास्नानं च। एतद्द्वयं शुद्धमासमलमासे च द्वयोर्नेवनि। उत्तरदेवकार्याणि पितृका
र्याणि चोत्तरपोरिति उक्तत्वात्॥ दशहरास्नानं तु ज्येष्ठमासि सिते पक्षे न वेति तच्चत्रक्षपांस्कंद

चातुर्मास्यसमारतत्र तविधिः श्राद्धं युगाद्युद्भवं
स्याद्धुद्धेच मलिम्लुचे दशहरास्नानं सिते दिक्कियौ॥

पुराणे॥ ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः॥ गरानंदव्यतीपाते कन्याचंद्रे वृषे रवौ।
दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्यते॥ इदं दशहरास्नानं युगादिश्राद्धं केश्चिदाचार्यैः सौर
रचामानात्प्रोक्तं॥ इदं सर्वं नमेवजितमते। परमस्यविरतिः॥ ॥ ३॥ ॥ ॥

का॰सि॰टी वैशाखेततीयाचांद्रतिथिर्युगादि॥ तत्र वैशाखवद्धौप्रमाणा वैशाखे प्रतिपदि संक्रांतौ सूर्यस्य
१० तृतीयोंशो नवति ततीयायामित्युपपन्नं॥ एवं भाद्रपदवद्धौ प्रमाणा भाद्रपदे कस्याकस्या
ष्टाविंशोंशोष्टाविंशतितमतिथौ त्रयोदश्या नवति॥ कार्तिकवद्धौ प्रमाणा कार्तिके सितन
वम्यां संक्रांते नवमोंशो नवति। माघवद्धौ प्रमाणा माघे त्रिंशत्तमतिथौ राशेस्त्रिंशत्तमो

॥ कैश्चित्सौरमितेद्वयं निगदितं दैवत्वनाशो पुनः॥
॥ संस्कारः प्रतिमासु वेतनमिदं कार्यं हि मासेधिके॥२० १०

शो नवति। तेन युगादिनिर्णयः सौरचांद्रसाहचर्यात्प्रमाणामासेष्वादतः॥ दशाहाल्पा
तं वु मलिनत्वेपि स समुपपन्नं। तत्र वर्षार्कस्यावश्यं ज्ञावित्वादितिसिद्धांतः॥ प्रतिमासुदुष्टस्य
शौदितौ दैवत्वनाशे पुनः संस्कारः वेतनं नान्नस्य जीवनमिदं पूर्वं व्याख्यातं॥ इदं सर्वमधिकेमा
सि कार्यं॥ २०॥

अथ मलेवर्ज्यान्याह॥ बुधैरेतानि बुध्या बुद्धिपूर्वकं अधिके मासे वर्ज्यानीत्युत्तरेणान्वयः। एतानि कानि
कालातिक्रमामानां अन्नप्राशनं निःक्रमणं समाहान्कृप्तिः नामकरणं एतान्यगतिकत्वेन वर्ज्यानि।
तत्र गार्ग्यः॥ नामकर्म च नाने ष्टियथाकालं समाचरेत्। अतिपाते तु कुर्वीत प्रशस्ते मासि पुण्यदे इति।

॥ कालातिक्रमतोन्ननिःक्रमसमाहान्कृप्तयोप्योचत्तो॥
॥ दाहक्षौरजनीष्टिकाम्यकरणारंभः समाप्तिस्तथा॥

अतिपाते कालातिक्रमे। अप्योचत बंध विवाहक्षौरजातेष्टिकाम्यकर्मारंभाः समाप्तिश्चेत्याद्वे
मक्षर्वर्तीयं दैवयात्रां वर्जयेत्। तत्र गार्ग्यः। अहर्वै देवतां दृष्ट्वा शुचः सुनेष्टां नार्गं वामलमासे
ष्पनात्ततीर्थयात्रां च वर्जयेत्॥ अनारब्धमित्यपूर्वमित्यर्थः॥ ॥ ॥ ॥

का॰सि॰दी॰ देवप्रतिष्ठाहाकाम्यवृषोत्सर्गादि वर्जयेत्। तथा च ज्योतिःपराशरः। अग्न्याधेयं प्रतिष्ठां च यज्ञदानव्र-
११ तानि च वेदव्रतवृषोत्सर्गचूडाकरणमेखलाः। मांगल्यमभिषेकं च मलमासे विवर्जयेदिति। दा-
नानि। महादानानि प्रतिष्ठा देवप्रतिष्ठा। वृषोत्सर्गः काम्य एव। अभिषेको राज्याभिषेकः। परं क्षितीर्थस्नाने

दृष्टाहत्त्रेमष्टर्वे तीर्थसुरयोर्यात्राप्रतिष्ठा मही॥ राम
काम्योक्षोद्वह आब्दिकं परमथोपाकर्मचोत्सर्जनं ११ ११

स्तरीयश्राद्धं च वर्जयेत्। तेनात्र शुद्धमासमृतस्य परं यदाब्दिकं निषिद्धं। तथा च सत्यव्रतः। वर्षे वर्षे च यच्छ्राद्धं मा-
तापित्रोर्मृतेऽहनि। मलमासे न कर्तव्यं व्याघ्रस्य वचनं यथेति। अन्यद्देवकार्याणि पितृकार्याणि चोत्तरे
। त्रयोदश्यादिलिखनं मलमासे नित्यश्राद्धदर्शश्राद्धपरं। उपाकर्मोत्सर्जने वर्जये

पुनर्वैश्वानर्याह। अग्न्याधानबुद्ध्यादि चार्यवर्ज्यानि। अग्न्याधानं राज्याभिषेकं च। एतौ हर्वेशोकेयारव्यात
न्तरौ। नवरात्राद्यं च नाडि। दीपावलीदीपमालिका। होलाहालिकाकरणं। अनन्तविष्णोरुत्थानस्वाप
पार्श्वविवर्तनं। महास्नानं। अष्टकाश्राद्धं यंकर्म। अपरपक्षश्राद्धं। श्रावणाकर्मादीनि॥ मासेष्वयाउदिता
नि तत्तद्विशेषाणि। मलमासे वर्ज्यानीत्यर्थः। तथा चोक्तं। मेलेनान्यगतिं नित्यं कुर्यान्नैमित्तिकीं क्रियां। सो

अग्न्याधानं नृपाभिषेकं नवरात्राद्यं च दीपावली। होलानोत्थितिसुप्तिपार्श्वविवृतिस्नानं महत्त्वाष्टका श्रा-
श्राद्धं चापरपाक्षिकं श्रवणिकाकर्मादि मासात्मया प्रोक्तानीह शुभानि मासव्यधिकके वर्ज्यानि बुधैर्बुधैः ११

मयागादिकर्माणि नित्यान्यपि मलिम्लुचे। पुष्टी आग्रयणाधानं चातुर्मास्यादिकान्यपि। महालयाष्टकाश्रा-
द्धोपाकर्मादीन्यपि कर्मैव तास्य पृष्टमासम विशेषास्त्वविहितं सवर्जयेन्मलिन इति। मासविशेषारम्भमिति दीपोत्स-
वहोलानवरात्रादि विष्णुशयनपार्श्वविवर्तनप्रबोधनर्न्तिकमपि। इति मलवर्ज्यानि॥ १२॥ ॥ ॥

का॰सि॰टी॰ अथक्षयमासि वर्ज्यकृत्यं चाह ॥ युतमलिम्लुचे वर्ज्यं तत्क्षयमासेपि वर्ज्यं। तत्र विशेषः। दर्शारब्धा
स्य समाप्तिरव नवति। अन्यथा कार्त्तिकमासस्य क्षयांतःपाते चातुर्मास्यव्रतानां असमाप्तिप्रसङ्गस्यात
१२ ॥आरंभानियमेदोषश्चासमासेष्वादित्तिकास्यायनवचनात्। द्वितीयारंभोपि नवति। अन्यथा पौषमास
स्य क्षयांतःपाते दर्शारब्धस्य माघस्नानस्य पुनरारंभः प्रसज्येत। तस्माद्द्वितीयारंभो नवति। एवमर्था

यदुक्तं च मलिम्लुचे नं दृष्टिवर्जं मासिक्षयाख्ये सनेत्प्रारब्धस्य समाप्तिरत्र पुनरारंभो विधेयस्त राम॰
या। क्षीणोयः खलु मासस्तदीयपरतो यो मास एतद्व्यितेयन्मो वत्सरमत्र मासितत्तु यत्संक्रांतियुग्मा १२
न्विति॥२३

स्त्वथमारंभोन नवतस्मिन्नुपपन्ने यो मासः क्षीणः क्षयेगतः तत्परो यो मासः। एतयोर्नैवयत्संव
त्सरीयं तत्संक्रांतियुग्मान्वितेक्षयमासे कर्तव्यं। तथाचोक्तं। एक एव यदा मासः संक्रांतिद्वयसंयुतः प्रमा
सद्वयगते श्राद्धं तस्मिन्नेव प्रकाश्यते इति॥ २४॥ ॥ छ॥ ॥

अथक्षयमासे मन्तिजन्मनो वर्षवस्थामाह॥ ॥संक्रांतिद्वययुते मासे जन्मत्विलेषु तिथिषु क्रमात् पूर्वा
परार्द्धयोः क्षीणस्याग्रिमस्य सर्वोत्सिययोश्चाशाः। जन्ममहोत्सवे सांवत्सरिकाद्यविमंत्सवस्याएतदुक्तं
नवति। कार्त्तिके चेत्संक्रांतिद्वयं नवति तदा कार्त्तिकः क्षयंगतः। तन्नाम मार्गशीर्षइति संपन्नं॥ अत्र मासे
मतिपक्षिप्रवार्द्धयदि जन्मनिर्दिश्तिवा नवति तदाग्रिमवर्षे कार्त्तिकमासि सित प्रतिपदि जन्मोत्सवसांवत्स

रिकः संक्रांतियुते खिलेषु तिथिषु प्रागंति मार्द्धक्रमात्॥
क्षीयास्याग्रिममासकस्यन्तियथा यो झेयाम्रतो जन्मनि॥॥

रिके नवतः। चेत्प्रतिपदुत्तरार्द्धे जन्म मृत्युर्वा नवेत्तदाग्रिमवर्षे मार्गशीर्षमासि सित प्रतिपदि जन्मो
त्सव वार्षिके स्तः। एवं द्वितीयादिषु पूर्वोपरार्द्धयो मास द्वयतिथ्युपक्रहनीयाः। तदुक्तमंत्यत्र। तिथ्य
र्द्धे प्रथमे परार्द्धितीये उत्तरे मासिविति तुधीश्विंत्यो क्षयमासस्य मध्यगा इति॥ ॥छ॥ ॥

का॰सि॰दी॰ अथगुरुजीवयोः शैशववृद्धत्वाद्याह। शुक्रः प्रागुदितस्त्रिदिनं शिशुर्भवति॥ तत्रैव बाल्यसप्ताहोदश
दिनं वृद्धो भवेत्। तदस्तं पश्चिमे पंचदिनानि वृद्धः स्यात्। तत्रैवोदितः द्विग्वासराद्दशदिनानि सूरिभिर्बा
१३ लप्रोक्तं स्तितदुक्तं रत्नमालायां। प्रागुद्गतः शिशुरहस्त्रितयं सितः स्यात्पश्चाद्दशाहमिह पंचदिना

॥ प्राक् शुक्रस्त्रिदिनं शिशुर्दशदिनं वृद्धो राम
भवेत्पश्चिमे तद्वत्पंचदिनानि बालवृद्धि
तौ द्विग्वासराः सूरिभिः॥२४॥ ॥॥ १३

निर्वृद्धः॥ प्राग्दृग्दिनानि कथितान्यत्र वसिष्ठमुख्यैरिति। अन्यत्रापि॥ उद्गतः सोदशपंचपश्चिमे
गति वशात्त्रिदशाह मपश्चिमे॥ शिशुजरत्व महाप्सुरयोस्तयोरिति॥ २५॥ ॥ ॥

अथगुरोः शिशुत्वजरत्वे आह॥ ॥ प्रागस्तात्सुरगुरुरस्तात्प्राक्। उदयात्परं पक्षेण पंचदशदिनैर्वृद्धः
शिशुर्भवति। जीवस्तु पक्षमिह वृद्धः शिशुश्च विभ्येरिति श्रीपतिवाक्यात्। एवं सिते बाले स्ते वृद्धे गुरौ वा
न याविधे वक्ष्यमाणान कुर्यात्। चौलादिनो विवाहान्ताः संस्काराः। ज्ञातव्यं गृहे। सुरास्थादेव प्रति

॥ प्रागस्तादुदयात्परं सुरगुरुः पक्षेण वृद्धः शिशुः॥
॥ बालस्त्रेस्य विरिसिते सुरगुरौ कार्यं न कुर्यादिह॥

श्रा॥ नववधूप्रवेशः। ज्ञाद्योपाकर्म। महापर्वो। महादानं व्रतानि नवोत्सर्गः॥ हरेत्याम
हारदशादिः। ज्ञध्वराः यागाः एतत्कार्यं न कुर्यादिति। तथा चोक्तं। बाले वाथ दिवाकरे दशुक्रे
॥२॥ ॥ ॥
वाप्तमुपागते मलमासदवे नानिवर्क्षपदे वदर्शनमिति॥

का॰सि॰दी॰ मलमासो कवर्ज्यानि सर्वाणि नम्याज्यानि। उक्तान्येव चौलाद्युद्वहनान्तेमिसादीनि। अमर्चद्यगुरुस्तगे
चगुरौ शुक्रे बाले वृद्धे मलिम्लुचे। व्रतारंभापवर्गं च न कुर्यान्मौञ्जिबंधनं। वापीकूपतडागादिप्र
१४ तिष्ठाद्यत्तकर्म च। गृहप्रवेशगोदानस्थानासनमहोत्सवान्। नकुर्यान्मलमासेपि गुरौ शुक्रे तथा
स्तगे इति गार्ग्यप्रोक्तं। जन्मर्क्षान्नीचस्थे च क्रितेवाप्यतिचरणगते वा यंजवत्स्तगे वासंन्यासो यः राम॰

॥चौलाद्युद्वहनान्तमालयसुरास्थानयवध्वागमा॥
॥धोपाकर्ममहार्णवाव्रतनचोत्सर्गाहरेस्याध्वराः२५ १४

स्नयात्राव्रतनियमविधिः कर्णवेधोपि शिक्षा मौंजीबंधोंगतानां परिवायनविधिर्वास्तुदेवप्र
तिष्ठास्याज्याः सद्भिः प्रयत्नाच्चित्रगृहपतिगुरौ सिंहराशिं प्रयाते इति। शुक्रास्ते प्रतिप्रसवमाह। निस्पया
नेगहेन्नीर्वाप्राशनान्तेषु सप्तसु। वधुप्रवेशे मांगल्ये नमो द्वांगुरुशुक्रयोरितिवधूप्रवेशस्सुधाहितापवे
वेशे॥२५

संमुखदक्षिणो शुक्रे निषिद्धमाह॥ ॥ शुक्रे पुरःपुरस्येवादक्षिणस्यैव न युक्ताबालयुक्ताराज्ञान
वोढाक्षिरागमे एकेपदं पदमात्रं नो गच्छेत्। तदुक्तं। गुर्विणीचालवत्सा च नवोढा न्नपातिलाया
।पदमात्रं नगच्छेच्च भृगौ संमुखदक्षिणो। परं तु एकपुरे। विवाहे तीर्थयात्रायां रश्मिविप्लवे प्रति
शुक्रो नालोक्यः। तदुक्तं। एकग्रामे पुरेप्यपि विवाहे नृपविप्लवे। दुर्भिक्षे तीर्थयात्रायां प्रतिशुक्रो

॥गर्भिण्यपत्नीकं पुत्रान्तपो न च वधूः शुक्रे पुरो दक्षिणो॥
॥ नो गच्छेत्सपदमेकपत्तनविवाहे तीर्थराष्ट्रप्लुतौः॥ ॥

नदुष्यतीति। चपुनरेत्वेषां भृगुः संमुखदक्षिणो नालोक्यः। अत एव वात्स्यकाश्यपभरद्वाजाङ्गि
रोवासिष्ठात्रिगोत्रोद्भवानां॥ तथा चोक्तं ज्योतिःशास्त्रे। काश्यपेषु वसिष्ठेषु भृग्वत्र्यांगिर
सेषु च। भारद्वाजेषु वात्स्येषु प्रतिशुक्रो न विद्यत इति॥ ॥३॥ ॥ ॥

का॰सि॰टी॰ अर्थे बृहस्पतौ वक्रे वाचातिचारगे तत्समयादेव शुभे कार्ये अष्टाविंशति वासरान् दिनानि त्य
जेदिति विवेकः॥ तथा च भूपालवल्लभे॥ अष्टाविंशति वासरान् सुरगुरोर्वक्रे तिचारे त्यजेत्सिंहे
२५ पंचनवांशकान् मृगगते पंचैव नीचांशकान्बालो वृद्ध इंगोगतां दशाहं दिनं शुभाश्च संवत्सरं दृष्टवैचात्त
मितेहितेसुधीरिह मोवाचगर्गेश्वरः॥ अत्रातिचारप्रसंगात् लुप्तसमाविचारः॥ च मेषमीनकुंभराशीतर राम॰

नाशो क्षयो नृणुवाससा काश्यपनरद्वाजं गिरोगोत्रियाणां॥ ॥ ॥
वासिष्ठात्रिभुवां च वक्रचलिते अंशे शुद्धि २८ वासरात्स्पष्यते २६ २५

राशीषु गुरुरतिचारंगतः पूर्वराशिं नाभ्येति तदा लुप्तसंवत्सरो न चेत्॥ तथा चोक्तं ज्योतिःसागरे
गो मीनान्त्य कुंभेतर नेतिचारगो न पूर्वं राशिं गुरुरेति वक्रितः॥ तदाविलुप्ताब्द इहातिनिंदितः शु
नेषुस्वासुरतिग्रगातरमेषवृषकुंभमीनेषु लुप्ताब्दो न भवत्येव॥ २६॥ ॥श्री॥ ॥

पुनर्गुरुविचारमाह॥ जीवे सिंहराशिंगते शुक्रास्ते पक्षे मृत्युके वा लायुध्यहनीतमित्यादि वर्ज्यं केचिदा
यें: सिंहमघागतं गुरुं संनेति॥ तन्न केमकरपंचांशगनीचांशगत्यनेति॥ गोदावरीदक्षिणतटेतिवासिनो व्रत
बंधविवाहक्षौरादि कार्यं कार्यं स्यात्॥ तत्र सिंहस्थे गोदाप्रवाहे गोदावरीस्नानात्परतरं तीर्थं नस्यादिति
तथाचोक्तं॥ सिंहराशिंगतो यस्मिन्दिने सुरगुरुर्भवेत्॥ तस्मिन्गौतमीस्नाने कोटिजन्माघनाशने॥ पु

॥ जीवे सिंहगते सितास्तगदिते वर्ज्ये विधेये तथा॥
॥ केचित्पित्र्यगतं त्यजंति च गुरुं न केपि पंचांशगे॥

कृष्णादीनितीर्थानि त्रैलोक्यस्थानि यानि च॥ वसंति वृषमेकं हि गौतम्यां सिंहगे गुरौ॥ जयवर
ज्योत्स्याहा मन्त्र॥ शांतिकं पौष्टिकं यात्रा प्रतिष्ठोद्वाहसर्जकं॥ नकुर्यात्सर्वमांगल्यं सिंहे याते बृह
स्पतौ॥ कर्त्तव्यमप्याह॥ ॥

का·सि·टी मन्त्रीधानादिकाः सर्वाः प्राग्ज्ञातानाः क्रियाश्रयाः॥ कर्त्तव्याः सर्वदेशेषु सिंहस्थेपि बृहस्पतौ॥ गो
२६ दावर्यन्तरे नागे नागीरथ्याश्च पश्चिमे। विवाहादि न कर्त्तव्यं सिंहस्थे च बृहस्पतौ। चरलोनातिकाला
मं दुर्भिक्षादेन्त्राविप्रवात्॥ गौतम्या दक्षिणे तीरे सिंहे नेष्णु दुहः श्रुतः। सिंहस्थेपि मघासं

॥गोदापाकृतटवासिनोच्चतविवाहक्षौरकार्यादिकं॥ राम·

॥कार्यं तत्र सदा त्र नापरतरे तीर्थे हि गोदाप्रवान्॥१७॥ २६

गुरुं यत्नेन वर्जयेत्। अन्यत्र सिंहनागेषु विवाहादिर्विधीयते॥ ॥इति निर्णयसिंधा
तेशुक्रास्तादिसिंहस्थांतनिर्णयः॥१७॥ ॥श्री॥ ॥ ॥ ॥

अथ मुख्यगौणादिकालनिरूपणं॥ यत्र कर्मणि यः कालो निहितउक्तोस्ति तस्मिन्कर्मणि एष कालः।
मुख्यो न चेत्। तदुक्तं। कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः। तया कर्म्मणि कुर्वीत ह्रासवृद्धी
न कारणमिति। मुख्यकालाभावे गौणकालमाह। तस्याभावश्चेदनेति। तस्य मुख्यस्याभावश्चेत्तस्मात्तिथि
शेषात्मकोपि गौणः॥ एतदुक्तं भवति मध्याह्नादिर्मुख्यकालो यस्मिन्कर्मणि विहितोस्ति तत्र कथंचिद्विघ्नो भ
मोः कर्म्मलोपजाते मुख्याभावेपि तत्तिथ्यादिशेषात्मके गौणोपि कर्तव्यं। तथा चोक्तं। मुख्यतिथ्यन्तराये वाति
कालः कर्मणि यत्र योस्ति निहितस्तत्रैव मुख्यो न चेत्तस्याभावश्चेत्तेन गौण उदितस्तिथ्यादिसबात्मकः
प्युक्तोपि गौणस्तामिति। प्रसंगात् श्रौते मुख्यकाल उच्यते। तत्रादौ उदरया कालमाह। तत्रोदरपांसाये प्रा
तरग्निहोत्रे गार्हपत्यादाहवनीयस्योद्धरणमनस्तमितादुदितपोरिति। मध्यमत्वात्तोदयादर्वागुक्तं तत्र का
लनियमाह। छेदनपरिच्छिन्ने। एतेषु ... षट्त्रिंशदङ्गुलैः प्रादुःकरणमग्नीनां प्रातर्नासां
चद्दर्शनादरिति। अत्र समयकृतोऽयुद्धेतोरुदरयानाचेमायश्चित्तिरस्ति॥ ॥

नथाचस्मृतिः॥ तद्दाहुर्यस्याहवनीयमनुद्धृतमादित्योभ्यस्तमियादिति तत्र कर्मका प्रायश्चित्तिरिति हरित
का॰सिं॰टी॰ त्त॰ हिरण्यं दर्भे प्रबध्य पश्चाद्दद्भिर्वैवस्वतादि। अथ होमकालः। अस्तमिते जुहोति। अनुदिते जुहोतीति कात्याय
नः। केचिदुदितहोमिनो न भवंति तेषां मध्ये पुरुषः स्यात्। अस्तमिते नुदिते कर्त्तव्यं। अनुदिते प्रायश्चित्तस्मरयात्
२७ अथ होमकालेष्वनुक्ते तत्र नियममाह। कात्यायनः। यावत्सम्यङ् भामंते नभस्यृक्षाणि सर्वतः। न च लोहित मा
त्राः स्यात्तत्रपनोदयांतमुदितः स्यात्त्रेत्तथा श्रौतको होमो निष्कृति सर्वकः। प्रथमतो गौणः प्रधानोपरः॥ २८॥ राम॰
येति तावत्सायं च हूयते। प्रातस्तु दूरयादनुसूर्योदयात्सर्वोकहोमकालोऽयोन्सिदूरति। स्मार्त्तेष्येव २७
मुख्यकालः। इति मुख्यकालानावे गौणः स्यात्। तद्यथा। स्मृतिः। स्मार्तः श्रौतकः श्रौतो वा होमो मुख्यानावान्त
रात्रः स्यात्। रात्रिरारभ्य सूर्योदयांतं प्रायश्चित्तपुरःसरः रात्रावेव स्यात्। एतदुक्तं भवति मुख्यकालाता
रास्यत पनोदयांतं सूर्योदयपर्यंतं प्रायश्चित्तपुरःसरः प्रातःप्राप्तो होमः स्यात्। तत्र गौणः प्रथमतः
प्रधानः परतः॥२८॥

एवंप्रातःकालाहास्यदिवसोतमपि तथा च। छंदोगे। सायंहोमात्यये प्राग्हुत्वातो सायमाहुतिप्रातर्हो
मं ततः कुर्याद्दिषएवोत्तराविधिरिति। एवं दर्शबाधे ततएव दर्शनादेव राकांतं पूर्णमास्यंतएवमेवात
त्ततोएकांतात कुहूवधिकं दर्शावधि। राकाबाधेप्येवमेव विधिः। तथा च छंदोगे प्राक्सायमाहुतेः
तेः प्रातर्होमकालानतिक्रमः प्राक्पौर्णमासाद्दिनस्य प्राग्दर्शाद्दिनस्य चेति। इतरस्य पौर्णमासस

एवं प्रातरनेहसोऽपि दिवसांतं दर्शबाधे पुनः॥
एकांतेन तत एव कुहूवधिकं गौणाद्यथैकात्यये॥

पौर्णमासस्येति॥ सायमाहनेः प्राक्पूर्वहोमस्याकालानतिक्रमो वर्त्तेति॥ सायंहोमासुरा प्रातर्हो
मं कृत्वा सायंहोमः स्यादिति नावः। एवं पौर्णमासात्प्राक्दर्शस्यापि॥ दर्शात्प्राक्पौर्णमासस्यापि॥ अ
यनेमित्त इति कुतश्चिन्निमित्ताद्देकात्ययेप्येकबाधे यदहनि हविर्द्वंद्वमनुषोः॥ ॥ ॥

का·सिं·टी· हव्यदिनयोरस्तिः स्यात्तदहरेव जुहुयात्। तथा चच्छन्दोगो। मलमासात्यये ह सहोता वा यदहर्नैवेत्।
२८ तदहरेव जुहुयाद्दमावास्यात्ययेपि चेति। प्रायश्चित्तपुरःसरमिदमपि। प्रायश्चित्तं तु श्रौते ज्ञाध्व
येवं। स्मार्ते स्वतादिष्टं। एवं संध्यासु मुख्यगौणाकालौ वर्त्तेते। तत्र मुख्यः। प्रातःसंध्या सनक्षत्रा मध्या

नैमित्तेयदहर्हर्विदिनतुषोरामिस्त्वदैवंविधिः॥ ॥ राम·
संध्यांस्वंतिमकालकेसतिकृतिप्राधान्यतः सर्वं चरेत् १९।

न्हे मस्तके रवौ। सायंकाले तु सा संध्या रविनक्षत्रवर्जितेति। अत्र मुख्यातिक्रमेः तिमकालके तत्पुर २८
संध्यावंदनकाले सति। कृतिसप्रायश्चित्तं प्रधानश्चैवं चरेत्तरति। एतदुक्तं भवति। प्रातःसंध्यालोपे
मध्यान्हे मध्यान्हसंध्यावंदनानानेतरं प्राप्ताया माद्युक्तं प्रायश्चित्तं कृत्वा प्रातःसंध्यांकुर्यादिति॥
एवमन्यत्रापि॥१९॥ ॥ ॥

अथावश्यंकर्त्तव्यमित्याह॥ ॥एवमत्र गौणेष्वपि कालेषु स्वशाखोक्तकर्मकरणमावश्यकं तत
त्कर्मणां त्यागो न कार्यः। असौ त्यागस्त्रिविधः। अत्र क्रियाऽकरणं। परकृतं परशाखोक्तं॥ यायीतो
नोक्तं तस्य यथार्थकृतं। तत्र कात्यायनः। अक्रिया त्रिविधा प्रोक्ता विद्वद्भिः कर्मकारिभिः। अक्रिया
च परोक्ता च तृतीया चायथाक्रिया। परोक्तकरणे दोषः। स्वशाखाश्रयमुत्सृज्य परशाखाश्रयं च यः।

॥गौणोप्येवमिहोक्तकर्मकरणं त्यागो न तत्कर्मणां॥
॥त्यागोसौ त्रिविधोऽक्रिया परकृतं यायार्थ्यतो नोकृतं॥

कर्तुमिच्छति दुर्मेधा मोघं तत्तस्य चेष्टितं। तस्य पुरुषस्य चेष्टितं कर्म मोघं निष्फलं स्यादिति॥
अविरोधिनि परोक्ते प्रतिप्रसवमाह। यन्नाम्नातं स्वशाखायां परोक्तमविरोधि यत्। विद्वद्भिस्तदनु
ष्ठेयमग्निहोत्रादिकर्मवदिति। अथ मौनादिमुख्यागौणकरणविधिमाह॥ ॥ ॥ ॥

का॰सिं॰टी॰ स्नातेगाकरणोत्तरेति॥ अंगस्याकरणोत्तरमध्ये स्नाते॥ इदं मंगं तत्रैव कार्यं॥ प्रधानाकरणोत्तरे स्नाते
तस्मादेव तत्स्नानादि तः पुनः कार्यं॥ समाप्तिषु धुरो मुख्यस्य जोपे तत्कर्माखिलमपि पुनः कार्यं॥ समा
१९ प्तावंगलोपे स्नाते तदंगमपि न कुर्यात्तः प्रायश्चित्तं तन्निमित्तं मोक्रियायां तु सांगं तत्क्रियेत पुनः
कुर्यात्॥ तथा च छंदोगपरिशिष्टे॥ कर्मापवर्गे तु तं स्नात्वा तावदेव पुनश्चरेत्॥ प्रधानस्य क्रियायां तु सां राम॰

स्नातेगाकरणोत्तरास्तु नरिदं कार्यं प्रधानाकृतौ॥ ॥ १९

तस्मादेव पुनः समाप्तिषु धुरो जोपेऽखिलं नांग के २०

गं तत्क्रियते पुनः॥ तदंगाकरणे कुर्यात्प्रायश्चित्तं न कर्म तत्॥ एवमन्यथा कुर्याद्यदि मो
हात्कथंचन॥ यतस्तदन्यथादेव पुनः कुर्यान्नावृत्तिः सर्वकर्मणां इति॥ ॥ इति निर्णयसिं॰
सिंधौ तेमुख्यगौणादिकालनिर्णयः॥ २०॥ ॥

अथ तिथिनिर्णयो निरूप्यते॥ तत्र शुद्धवेधादिभेदमाह॥ सूर्यास्ते वा सूर्योदये या मुहूर्तत्रयमि
ता तिथिः॥ सा सूर्यास्तात्पश्चिमा वा सूर्योदयादग्रा॥ अग्रिमपश्चिमां तिथिं विध्यति॥ एतदुक्तं माध
वे॥ उदये पूर्वया तिथ्या विध्यते त्रिमुहूर्तकैः॥ सायं तूत्तरया तद्वन्न्यूनया न तु विद्यते॥ वेध्यापि वि
मुहूर्तैव न तस्या वेधमर्हति॥ शुद्धा विद्धा तया शुद्धा हीना तिथ्यान्ययाहनि॥ अन्यया तिथ्या ही

॥सूर्यास्तोदययोः क्षणत्रयमिता तत्पश्चिमाग्रा तिथि॥

॥विध्यत्यग्रिमपश्चिमां तिथिमयोः पूर्वापराह्णे द्विधा॥ ॥

नाया तिथिः सा शुद्धा॥ अन्यया तिथ्या युक्ता सा विद्धा॥ शुद्धायां नास्ति संदेहो द्वैधे पित्र्ये च कर्मणी
ति॥ अथ दिनविभागमाह॥ अहर्द्विधा तत्र पूर्वापराह्णौ स्तः॥ पुनरह्नस्त्रित्वे चैते क्रमात्पूर्वा
ह्णमध्याह्नापराह्णा भवंति॥ पूर्वाह्णो वै देवानां मध्याह्नो मनुष्याणामपराह्णः॥ ॥ ॥

का·सि·टी· पितृणामिति श्रुतेः। पंचधाह्नि तन्त्रे प्रातः संगवमध्याह्नापराह्णसायमिति संज्ञाः स्युः अह्नि विभ
क्ते इति दिनमानघटिका त्रिधा पंचधा वा नाड्यः। तदेव तस्य मायां भवति। तथा चोक्तं वृद्धपराश
२० रेण॥ लेखा प्रभृत्यथादित्यान्मुहूर्त्तास्त्रय एव च। प्रातस्तु स स्मृतः कालो भागश्चाह्नः स पंचमः॥
संगवस्त्रिमुहूर्त्तोथ मध्याह्नस्तत्समः स्मृतः। ततस्त्रयो मुहूर्त्ताश्च अपराह्णो विधीयते॥ पंचमोथ राम

॥ तन्त्रेऽह्नि त्रिलवैस्तथा क्रमवया पूर्वाह्णमध्यापराः॥
॥ प्रातः संगवकौ च मध्यमपराह्णौ सायकं चैधा॥२२॥ २०

दिनांशोऽयः स सायाह्न इति स्मृतः। यद्यत्तेषु विहितं तत्तत्कुर्यादिति चक्षणार इति॥ द्वेधा विभागाद
यस्तु यत्र कथितु युक्तास्तत्रैव कर्त्तव्याः। एतत्सर्वं तत्तत्कर्मविशेषस्य तत्तत्प्रागाकालकथने च तत्तत्क
र्मविशेषे यातिथिनिर्णये वक्ष्यते॥२१॥

अथ सामान्यतस्तिथिनिर्णयः। शुक्ले पंचेंदुः प्रतिपत्। नगमः सप्तमी। लक्ष। नवमी विश्वे त्रयोदशी। र
चयोद्वादशी। एताः पूर्वविद्धाः स्युः। कृष्णपक्षे द्वितीया। रवयः पंचमी। नगाः सप्तमी। अष्टा अष्टमी। नंदाः न
वमी। रवयो द्वादशी दिशो दशमी भूतं चतुर्दशी। एता अपि पूर्वविद्धाः स्युः। प्रतिपत्संमुखी कार्या यान

॥ शुक्ले चंद्रनगांकविश्वरवयः स्युः पूर्वविद्धास्तथा॥

वेदापराह्णिकातिस्कंदपुराणवचनात् शुक्लप्रतिपत् पूर्वविद्धैव कर्त्तव्या। सप्तमी पक्षयोरुभयोः पू
र्वविद्धैव ग्राह्या। तथा चोक्तं स्कंदे। षष्ठ्यायुता सप्तमी च कर्त्तव्या तात सर्वदा। षष्ठी च सप्तमी यत्र त
त्र संनिहितो हरिरिति। नवमी तूभयोः पक्षयोः पूर्वविद्धा कार्या। न कुर्यान्नवमीं तात दशम्या तु कदाचनेति
स्कांदे। शुक्लत्रयोदशी तु पूर्वा। त्रयोदशापि कर्त्तव्या द्वादशीसहिता विभो इति ब्रह्मवैवर्त्तवचनात्॥

का॰सि॰टी॰ द्वादश्युत्तरयोः पक्षयोः पूर्वविद्धा ग्राह्या॥ अष्टमी च प्रकर्तव्या एकादश्यपि सुता विनो। सर्वकार्येषु विद्वद्भि
र्विद्धा न कि परायणीति॥ कृष्णे द्वितीया पूर्वविद्धा कार्या। प्रतिपत्सम्मुखी कार्या द्वितीया प्रतिपद्युता
२१ ।कृष्णे पंचमी पूर्वा। पंचमी तु तथा कार्या चतुर्थ्या सहिता विभो इति स्कंदवचनात्। सप्तमी प्रागुक्ता
।कृष्णाष्टमी पूर्वा ग्राह्या। कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी॥ पूर्वविद्धा तु कर्तव्या परविद्धा न क राम॰

॥कृष्णे द्वीषु नगाष्टतेरर विदिकभूतास्तु पूर्वान्विताः॥

हेद्विरिति। नवमीद्वादश्यौ प्राक्कलिस्विने। कृष्णपक्षे दशमी पूर्वविद्धा। दशमी चैव कर्तव्या सदुर्गा द्विजसत्तमे २१
स्कंदवचनात्। कृष्णपक्षे चतुर्दशी प्राक्पूर्वा निर्णीता। एवं पूर्वविद्धा निर्णीय परविद्धा आह। शुक्ले द्वित्रीति। दे
द्वितीया। त्रयस्तृतीया। चत्वारश्चतुर्थी। शराः ५ पंचमी। अंगानि षष्ठी। वसवोऽष्टमी। दिशो दशमी। रुद्रा एकादशी
एं प्राश्चतुर्दशी॥

राका पौर्णमासी॥ कृष्णे कृष्णपक्षे त्वग्नी प्रतिपत् रामास्तृतीया। षट् षष्ठी। युगानि चतुर्थी॥ हरा एकाद
शी॥ अमावास्या विश्वसंख्यया त्रयोदशी॥ एताः परविद्धाः कार्याः॥ शुक्ला द्वितीया परविद्धा कार्या। शुक्लप
क्षे तिथिर्ग्राह्या यस्यामस्तुदितो रविरिति। तत्राप्युभयोः पक्षयोः परविद्धा ग्राह्या। रेनाख्यां च वर्जयित्वा तु तृतीयां
चंद्रिनो तमः। अन्येषु सर्वकार्येषु गणयायुक्ता प्रशस्यते इति ब्रह्मवैवर्तवचनात्। गयायुक्तेति चतुर्थी यु

शुक्ले द्वित्रिचतुःशरोगवसुदिक्रुद्रेशकाः पराः॥

क्तेत्यर्थः। चतुर्थीह परविद्धा शुक्ले कार्या। युगान्नूतानामिति वचनात्। शुक्ला पंचमी परविद्धा ग्राह्या। पं
चमी तु प्रकर्तव्या षष्ठ्या युक्ता तु नारदेति ब्रह्मवैवर्तवचनात्। षष्ठी तु पक्षयोरुभयोः परा ग्राह्या। नागवि
द्धा न कर्तव्या षष्ठी चैव कदाचन॥ सप्तमी सयुता कार्या वर्षे धर्मार्थचिंतकैरिति स्कंदे। शुक्लाष्टम्युत्तरा ग्राह्या

का·सि·टी· शुक्ले पक्षेष्टमी चैव शुक्ले पक्षे चतुर्दशी॥ पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुतेति। शुक्ला दशमी परा ग्राह्या।
सर्वकार्येषु दशमी कृष्णा पूर्वा त्वरा सितेति ब्रह्मवैवर्तवचनात्। एकादशी द्वयोरपि परा कार्या। एकादशी न क
२२ र्तव्या दशमीसहिता विभो। इति स्कंदपुराणवचनात्। चतुर्दशी प्रागादृता। पूर्णमास्यमावास्ये परे। एका
दश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी। अमावास्या तृतीया च ता उपोष्याः परान्विता इति विष्णुधर्मोत्तरे राम·

कृत्स्नः शालिशिरा मवट्युग हरामाविश्वसंख्यास्तथा॥ २२ २२

स्तु दर्शं च पौर्णमासं च पितुः सांवत्सरं दिनं। पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यत इति सावित्री पूर्वा
माचरयेत्। अमापरं वचनं। कृष्णा प्रतिपदुत्तरा ग्राह्या। प्रतिपत्सद्वितीया स्यात् द्वितीया प्रतिपद्युतेति
प्रतिपद्युतेति ज्ञापस्तंबवचनात्। तृतीया चतुर्थी कारश्रमाः पूर्वव्याख्याताः। कृष्णा त्रयोदशी तु परविद्धा का
र्या। षष्ठी सप्तमी त्वमावास्या कृष्णपक्षे त्रयोदशी। एताः परयुताः पूज्याः पराः पूर्वेण संयुता इति निगमे॥ २२॥

अथाष्टमीचतुर्दश्योः कंचिद्विशेषमाह। देवीत्यादि। देव्या गौर्या व्रते तद्व्रते रुक्मिणीव्रते याष्टमी सा प
युता कार्या शुक्ला कृष्णापि। अष्टम्या नवमी विद्धा नवम्या चाष्टमी युता। अर्धनारीश्वरप्राया उमामाहेश्वरीति
थिः॥ अष्टमीनवमीयुग्मे महान्या हे महोत्सवः। शिवरात्र्यास्येः शिवरक्षे त्रपक्षयोरुभयोरपीति पद्मपुराणो
वचनात्॥ सावित्र्यामिति सावित्रीव्रते दर्शपौर्णिमा पूर्वविद्धा ग्राह्या। तद्विरतिः पूर्णिमा निर्णयेका र्या। चप

देवीगौरीव्रतकेष्टमी परयुता कृष्णासिताष्टमी मा॥
सावित्र्यां प्रथमा च चैत्रनभसोः शुक्ला चतुर्दश्यपि॥

र चैत्रनभसोश्चैत्रश्रावणयोर्या शुक्ला चतुर्दशी सा पूर्वविद्धा ग्राह्या॥ दमनकपवित्रारोपणयोः॥ म
योः श्रावणमासस्य शुक्ला या तु चतुर्दशी। सा रात्रिव्यापिनी ग्राह्या परा पूर्वाह्णगामिनीति बौधाय
नवचनात्॥

का॰सि॰टी॰ अथयुग्मतिथिनिर्णयमाह ॥ ॥ पंचाब्ध्योः पंचमीचतुर्थ्योः। मुनिरामयोः द्वितीयातृतीययोः ॥ षड्गयोः ष
ष्ठीसप्तम्योः। वस्वंकयोरष्टमीनवम्योः। रुद्रार्कयोरेकादशीद्वादश्योः। कमयोः प्रतिपद्दर्शयोः। तिथीश
२३ मितयोः पूर्णिमाचतुर्दश्योः। एतयोस्तिथ्योर्मिथो युग्मं सत् श्रेष्ठमुक्तं। तथा च निगमे। युग्माग्नि राम॰

पंचाब्ध्योर्मुनिरामयोः षड्गयोर्वस्वंकयोः सद्युगं ॥ ॥
रुद्रार्कयोः कमयोस्तिथीशमितयोः साधारणो निर्णयः ॥ २३

गकृतानां षण्मुन्योर्वसुरंध्रयोः। रुद्रेण द्वादशी युक्ता चतुर्दश्या च पूर्णिमा। प्रतिपद्यप्यमावा
स्या तिथ्योर्युग्मं महाफलं। एतद्व्यस्तं महादोषं हंति पुण्यं पुराकृतमिति॥ अयं साधारणो निर्णयः
॥२३॥

अथ युग्मादरं निरूप्यते ॥ ॥ चेद्यदि कर्मणो नेहसि कर्मकाले तिथिः दिनद्वये व्याप्नोति वा दिनद्वयेऽपि न
व्याप्नोति वा दिनद्वये समं नागे नैकदेशेन समं प्राप्नुयात्तत्रानुक्तव्रतविशेषे सति युग्मादरो भवतीति शेषः ॥
अत्र युग्मविचारे कर्मकालव्यापिनी ग्राह्या। तत्र युग्मादरो न। एतदुक्तं भवति॥ किंचिदष्टमीव्रते मध्याह्न
कालकर्तव्यमस्ति तत्र पूर्वदिवसे मध्याह्नव्यापिन्यष्टमी वर्तते परेह्नि किंचिन्न्यूना भवति नवमीयु
कर्मणो नेहसि चेत्तिथिर्दिनद्वयोः पूर्णा न किंचित्तथा नागे नापि दिनद्वयं समभियात्तत्रैव युग्मादरः ॥
कर्मणस्तथा कालगात्र सुधिया ग्राह्या न युग्मादरस्तदा रात्र्युक्तव्रतजागरेऽपि च तथा ग्राह्या निशागामिनी।२४॥
कार्यमस्ति तत्र युग्मादरं विहाय कर्मारंभं विहाय कर्मारंभकालव्यापिनी ग्राह्येति स्पष्टं। रात्रौ प्रोक्तं यद्व्रतं
वा जागरस्तत्र निशाव्यापिनी तिथिर्ग्राह्या। तथा च नारदोक्तिः अहस्सु तिथयः पुण्याः कर्मानुष्ठान
तो दिवा। नक्तादिव्रतयोगे तु रात्रियोगे तु योगो विशिष्यते इति। नक्तादिग्रहणेन जागरणादिग्रहणं
२४॥ ॥ इति निर्णयसिद्धांते साधारणतिथिनिर्णयः ॥ ॥ १ ॥ ॥ ॥

का॰सि॰टी॰ अथ व्रतार्थे विशेषनिर्णयमाह॥ ॥तत्रैकनक्तव्रतनिर्णयः॥ अहनि क्रमान्नेत्रेधा नक्ते वा पंच
धा नक्ते मा ध्याह्निके भागे परे हि मुख्यमेकतमस्नानमित्येकनक्तव्रतं स्यात्। दिनार्द्धसमये तीते भुज्यते नि
२४ यमेन यत्। एकनक्तमिति प्रोक्तं स्नानं यासत्रयेण तु रविवद्वचनात्। रतो मध्याह्नात् परार्द्धतो लमया व

त्रेधा वाहनि पंचधैकमन्नं माध्याह्निके द्वे परे॥ मुख्यं चाल्पमया लम
र्थी तदुदितं गौणं समव्याप्तिनः। तिथ्यो युग्मतिथी रितान्नदिवसा
या मिर्द्वयोर्वा ग्रता स्यु व्याप्त्या प्रथमैव तत्र विषमव्याप्त्याधिकाग्रह्यते। २५ २५

धिगौणामेकनक्तमुदितं। दिनार्द्धसमये तीते रविवचनात्। तिथ्योर्दिनद्वये मध्याह्नसमव्याप्तितः युग्मतिथी रितान्निर्ण
यस्युग्मतिथिवचनादितिभावः। यदा द्वयोर्न व्याप्तिर्वा नागतस्तु व्याप्तिस्तदा प्रथमैव तिथिरेकनक्ते ग्रह्यते॥
विषमव्याप्त्याधिकासा ग्रह्यते॥ २५॥

अथ नक्तव्रतविचारः॥ अस्तादर्कात्त्रिमुहूर्त्तके प्रदोषकाले नक्तव्रतकं स्यात्॥ प्रदोषव्यापिनी ग्राह्या
तिथिर्नक्तव्रते सदा। प्रदोषस्त्रिमुहूर्त्तः स्यादवावस्तंगते सतीति स्कंदपुराणवचनात्। यद्यप्यर्कास्तम
यादूर्ध्वं त्रिमुहूर्त्तः प्रदोषकालस्तथापि नक्षत्रदर्शनादनंतरं नक्तव्रतं कर्त्तव्यं। संध्यायां भोजन
निषेधात्। तथा चोक्तं। तथा चोक्तं। चत्वारि मानि कर्माणि संध्यायां परिवर्जयेत्। आहारं मैथुनं निद्रां

स्यान्नक्तव्रतकं प्रदोषसमये स्तात्त्रिमुहूर्त्तात्मके॥
व्याप्त्याहर्द्वितये परत्र नहि चेदव्याप्तिश्च तिथ्योर्द्वयोः॥ ॥

स्वाध्यायोपि चतुर्थकः॥ आहाराज्जायते व्याधिर्दुष्टगर्भश्च मैथुनात्। निद्रया क्षीयते लक्ष्मीः स्वा
ध्यायान्मरणं ध्रुवमिति। अहर्द्वितये प्रदोषव्याप्त्या परत्र परदिने नक्तव्रतं स्यात्। तत्र नो चालिः
यदि स्यादुभयोस्तिथ्योः प्रदोषव्यापिनी तिथिः। तदोत्तरत्र नक्तं स्यादुभयत्रापि सा यतः इति॥ ॥ ॥

का॰सि॰टी॰ वेधद्वितयोस्तिथ्योर्न हि व्याप्तिस्तदा परत्र परेह्नि सायाह्नकाले नक्तव्रतं स्यात्॥ तथा च स्कान्दे॥ प्र
दोषव्यापिनी न स्याद्दिवा नक्तं विधीयते। आत्मनो द्विगुणच्छायां मन्दीभूते दिवाकरे। तन्नक्तं नक्तमि
२५ त्याहुर्न नक्तं निशि भोजनमिति॥ अन्यविषयेप्येकदेशसमव्याप्तौ वा विषमव्याप्तौ एकनक्तो कोवि
धिः॥ एकभागेन तुल्यत्वे उत्तरत्र। विषमव्याप्तावाधिका साग्राह्येति। भिक्षुर्वा यती नो विधवा नो राम॰

सायाह्नेन्यत्र परत्र चान्यविषये प्येका त्वनोक्तो विधिः॥॥
भिक्षुर्वाथ विधवा रविव्रतवतां सायं सदास्याद्भुजि २६॥ २५

रविव्रतवतां सदा सायाह्नकाले तु भुजिः स्यात्। नक्षत्रदर्शनान्नक्तं गृहस्थस्य विधीयते। यतेर्दि
नाष्टमे भागे तस्य रात्रौ निषेधतः। अन्यच्च। नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः। यति
श्च विधवा चैव कुर्यात्तत्सदिवाकरं। सौरे नक्ते तु सायाह्नव्यापिनी न प्रदोषगेति स्पेकनक्तादिनिर्णयः
॥२६॥

अथ व्रतविशेषतिथिनिर्णयः॥ शुक्ला प्रतिपदा दर्शयुता कला तु द्वितीयान्विता। उदितेति प्रा
गुदिता। चैत्रधुरि स्थिता प्रतिपदा शुक्ला चैत्र प्रतिपदपि द्वितीयान्विता ग्राह्या। एतत्तु संवत्सर
प्रवृत्तिविषयं चाविचारविषयं उपवासादौ न। तथा चोक्तं। या शुक्ला प्रतिपच्चैत्रमासस्य वत्सरा।

॥ शुक्लादर्शयुतोदिता प्रतिपदा कलाद्वितीयान्विता॥
॥ तद्वच्चैत्रधुरि स्थिता यच्च बहुदेशकालान्विता फाल्गुने॥

सदा पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता। मुहूर्तद्वितये वापि मुहूर्त्तेय दिवा परा। वर्त्तते या
सूर्योदये यस्मिन् प्रातः सोऽधिपतिर्न चेतना गुणः॥ उदये प्रतिपत्शेषं मुहूर्त्तमपि न दृश्यते। तस्मिन्नहनि तु
यो वारः स तु संवत्सराधिपरति॥ ॥ ॥

का.सि.टी. फाल्गुनेमासिबहुलेकृष्णपक्षेप्रतिपदाकान्वितापौर्णमासीयुताकार्या।एतदपिहोलिका
निमित्तंपास्त्यत्वपरं॥अथद्वितीया॥ ॥ऊर्जेकार्तिकेसिताद्वितीयायमयमीनगीनी
२६ गृहेभोजनविधौप्रतिपद्युताग्राह्या॥यमयजिस्कंदीपोत्सवनिर्णयेग्रेजेख्या॥शेषाः राम.

मास्यूर्जेप्रतिपद्युतायमयजोग्राह्याद्वितीयासिता
शेषास्यूक्तविधानतोत्रकृतिभिःकृष्णासितास्यादृताः२७ २६

सिताःकृष्णाद्वितीयास्तकृतिभिरादायैरुक्तविधानतइतिसाधारणोक्तनिर्णयविधेरा
दृताःसंति
२७।

अथतृतीया।राधेवैशाखेमासिशुक्लतृतीयापितृयुगाद्यायांपितृतर्पणदेवार्चनेऽन्हादेधान्तखंड्यो
:ऽहर्व्याह्निकीग्राह्या।सासोमबुधवारान्वितावारोहिणीयुताश्रेष्ठाभवति।तथाचनारदीये।वैशाखे
सितपक्षेतुतृतीयारोहिणीयुता।दुर्लभाबुधवारेणसोमेनापिविशेषतः इति।रोहिणीबुधयु
क्तापिपूर्वैर्विद्धाविवर्जिता।तस्यांकृतापिमाधतःपुण्यंहंतिपुराकृतं।गौरीविनायकोपेतारोहि

राधेशुक्लतृतीयिकापितृयुगाद्यायांचपूर्वाह्निकी॥
द्वैधाह्नःकृतखंडयोःपितृमखेकेचित्पराह्नास्थिता॥३॥

णीबुधसंयुता।विनापिरोहिणीयोगात्पुण्यकोटिप्रदायिनी।गौरीविनायकोपेतेतितृतीयाचतुर्थी
युक्ताकार्या।साकोश्चिदापार्यैःपितृमखेपितृपतर्पणेपराह्नस्थिताग्राह्यते।यत्तुकालादर्शेमाधवास्यापरा
ह्निकास्युक्ता।एवंमन्वंतरादीनांयुगादीनांचनिर्णयः॥

महालयस्य पक्षस्य अष्टकानामपि स्मृतः। युगादीनामपि सर्वेषामपराह्णव्यापित्वेन प्राशस्त्यमुक्तं
तदनंतरं तेषामपि। मन्वाद्यास्तु युगाद्यास्तु मेत पक्षेष्टकासु च। श्राद्धेषु दत्तं विकुर्यात्तिथ्यादिष्वेव
मेव हि। यत्तु। देशु कैदैतथा कलियुगाद्याः कवयो विदुः। शुक्ले पूर्वाह्णिके ग्राह्यो कृष्णे ग्राह्योपराह्णि
के। शुक्ले पूर्वाह्णिके ग्राह्येति मध्याह्नात्पूर्वं शुक्ले युगादिश्राद्धमारभेत्। कृष्णे मध्याह्नादुपरि अप

श्रेष्ठा सोमबुधान्विता कृतयुगा तारंनातुः पूर्वान्विता॥ ॥
गौर्यर्थमौदयिकी मुहूर्त्तमपि चेन्माघास्ता तृतीयाखिला।२८॥

राह्ने एव वेत्यर्थः। अतः युगादिप्रयुक्त श्राद्धविषये रमा वास्या वत् पूर्वाह्णिकी ग्राह्या। लक्ष्मीनारायणाह
लादो चतुर्थीश्रुते व ग्राह्येति सिद्धांतः। रंभा तृतीया पूर्वान्विता ग्राह्येति। नाखंवर्जयित्वेत्यादिग्राक लि
खितं। गौर्यामिति गौरीव्रते ऽहदयिकी मुहूर्त्तमात्रापि ग्राह्या। एतद्व्यतिरिक्ता खिलापि पूर्वाह्णिकी ग्राह्या॥
॥२८॥

अथ चतुर्थीनिर्णयः॥ ॥ भाद्रे मासि शुक्लचतुर्थिका गणेशार्चने गणेशस्मरणे मध्याह्नगता ग्राह्या। मासि भाद्रपदे
शुक्ले चतुर्थ्यामर्चयेन्नृप। मध्याह्ने स्नानेशस्यरूपं कृत्वा विधानतः। नित्यकर्म समाप्याशौ कलोक्तविधिना ततः
। गंधपुष्पाक्षतैश्चैव मध्याह्ने देवमर्चयेदिति निर्विष्णुधर्मवचनात्। तथा च। चतुर्थी गणनाथस्य मातृविद्धा प्रश
स्यते मध्याह्नव्यापिनी सा तु परतश्चेत्परेऽहनि॥ इति। बृहस्पतिवचनात्। परतश्चेदिति पूर्वदिनानावेतात यदि
भाद्रशुक्ला चतुर्थी कोतिकन्निकागताविधेत्रा नागार्चने॥
स्यान्मध्याह्नगताथ संकटचतुर्थी हिंदयव्यापिनी॥ ॥।॥
दिनद्वयेपि मध्याह्नव्यापित्वे दिनद्वये स्पर्शेनावेवा एकदेशतुल्ये स्पर्शे च तृतीयायुक्ता ग्राह्या। मातृविद्धा
प्रशस्यते इति वचनात्। ऊर्जे तौ ता कार्त्तिकस्य कृष्णचतुर्थी नागार्चने मध्याह्नगा ग्राह्या। युग्मे मध्यं
दिने यत्र तत्रोपोष्य फणीश्वरान्॥

का॰सि॰टी॰ क्षीरेणाभ्यावंचमध्येपारयेत्स्वयतोनरः। विघ्नाद्धितस्य नश्यंति न ते हिंसंति पन्नगाः इतिपुराणसमुच्चये
। युगचतुर्थी। अथसंकटचतुर्थी। संकटव्रते चतुर्थी इंदूदयव्यापिनी ग्राह्या। चेद्दिनद्वयेऽपि हद्वितये विधूद
२८ येचंद्रोदयकाले परिगता मासा। चेन्नैकत्रविधूदये तदा सा परा ग्राह्या। दिनद्वयेपि चन्नेत चतुर्थ्या
विधूदये। परे वन्नतिनिः कार्या गणनाथपरायणैः। चेद्वोदये यदा नस्याद्दिवापि दिनद्वयोत्र दोषक्वा।

चेद्दृष्टोभयविधूदये परिगता नैकत्र चेद्दृश्यगा॥ ५ राम॰
गौर्याख्या बहुलात्तृतीयतिथियुक्ग्राह्यापराह्णस्थिता।२९॥

पिनीग्राह्या। चतुर्थी संकटव्रते इतिपुराणसमुच्चयवचनात्। गौर्याख्या चतुर्थी गौरीचतुर्थी बहुलानु २८
र्तीतृतीयतिथियुक्ततृतीयायुक्ता। अपराह्णस्थिताग्राह्या। तथाचोक्तं। गौर्याश्चतुर्थी विरधेनुहृजा
दुर्गार्चनेतु निरहोलिके च। वत्सस्पृहजा शिवरात्रिरेताः पराविनिघ्नंति नंपरा पूर्वमिति पुराणसमु
च्चयवचनात्। धेनुहृजा बहुलाचतुर्थी। वत्सहृजा च वत्सद्वादशी॥२९॥ ॥ ॥ ॥

अथपंचमी॥ शुक्ला वा कृष्णा पंचमी क्षयात्रयमिता मुहूर्तत्रयव्यापिनी नागार्चने नागपूजायां ग्राह्या। श्रा
वणे पंचम्यां शुक्लायां संप्रोक्ता नागपंचमी॥ तां परित्यज्य पंचम्यश्चतुर्थीसहिता हिताः। तां नागपंचमीं विहायान्याः पं
चम्यश्चतुर्थ्यान्विता हिता मताः। तस्याश्चतुर्थीविद्धायाः निषेधात्। कृष्णापि श्रावणपंचमी नागपंचमी क्वचित्प्र
रतिनतएव शुक्ला वाप्यसितेत्युक्तं। अस्यांतु ननसः पंचमी। शुक्ला त्रिमुहूर्तयुता परा। एकत्र कृतव्रते ग्राह्यास्ताते

शुक्लावाप्यसिताक्षयात्रयमिता नागार्चने पंचमी॥
ग्राह्या नाद्रपदे मुनिव्रतपरैः शुक्ला मुहूर्तद्वयी॥ ॥

चैत्राद्दिश्रजनदृति। नाद्रपदे मासि मुनिव्रतपरैः ऋषिपंचमीव्रतपरैः शुक्ला पंचमी मुहूर्तद्वया मुहूर्तद्वय
व्यापिनी ग्राह्या। नविद्या भवे। मासि नाद्रपदे शुक्ले पंचम्यां पूजयेन्मुनीन्। मातर्नायांतु सुस्नात्वा कश्यपाद्यांश्च
सप्तवै। पंचमी चैव कर्तव्या वेध्या सुश्रा च भारत। मुहूर्तद्वितये वापि पंचमी यदि वा न चेत्। ऋषीणां पूजनं चैवं
कर्तव्या व्रतिभिः परा। चतुर्थी संयुता यो च पंचम्यामृषिपूजनं। व्रतिभिर्नैव कर्तव्यं यदि चेन्निःफलं भवेदिति
यद्यपि मुहूर्तद्वयव्यापिनी ग्राह्योक्ता तथापि सक्षये॥

का.सि.दी. मुहूर्त्तत्रयव्यापिन्यास्यात्। तत्र दक्षः। त्रिमुहूर्त्तान्न कर्त्तव्या या तिथिः क्षयगामिनी। द्विमुहूर्त्तापि कर्त्तव्या या तिथि

र्वृद्धिगामिनीति। अथ पंचमी। स्कंदव्रते तु स्कंदार्चने तत्पूर्वविद्धा ग्राह्येति। स्कंदोपवासे षष्ठीकार्या पंचमीपरसंयु

२९ क्तेति वचनात्। अथ षष्ठी। षण्मुहूर्त्तमानादल्पापि यदि पंचमी तदा ग्राह्या षष्ठी पूर्वविद्धा कर्त्तव्या। अन्यथा तदधि

के पंचमीविद्धा पश्चात् परा। नागविद्धा च या षष्ठी शिवविद्धा च सप्तमी। दशम्येकादशी विद्धा नोपोष्याः स्युः कथंच राम.

तद्वत्स्कंदव्रते नो च षट्क्षयमिता ज्ञेया ग्राह्य षष्ठ्यन्यथा ॥ ॥

पश्चात्सप्तमिका रथोदयगता माघे सिता त्याज्ययुक् ॥ ३० २९

नेति। निषेधप्रयोगकस्त्वत्र पंचमीवेधो न सामान्यरूपद्विमुहूर्त्तात्मकः किंतु षण्मुहूर्त्तात्मकः। नागो द्वाद

शनाडीभिर्दिक्पंचदशभिस्तथा। भूतोष्टादशनाडीभिर्दूषयत्युत्तरां तिथिमिति स्कंदपुराणात्। स्कंदषष्ठी

तु पूर्वविद्धैव कार्या। कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिश्चतुर्दशी। एताः पूर्वयुताः कार्यास्तिथ्यंते पारणं भवेदिति

। अथ सप्तमी। माघे मासि सिता सप्तमी रथाख्या अरुणोदयगता स्नानदीपकरदाने नाडी ग्राह्या। रथसप्तमी प्रो

क्ता। अन्या सर्वापि सप्तमी ग्राह्या षष्ठीयु

क्ता ग्राह्या सर्वे ३०

नवत्रके। अंतराःसूतकेतत्रक्रियाकार्या कथं बुधैः। सूतके चेद्भवेन्नास्ति तत्र देवी समुद्दिश्य कर्तव्यं तत्र हो
माश्च कर्तव्या मंत्रैर्यत्तविधानतः। सूतके सूतने प्रोक्तं हानं चैव विशेषतः देवी मुद्दिश्य कर्तव्यं तत्र हो
बोनविद्यते। प्रारंभात्प्राक्समाया तं यदि चेत्सूतकादिकं। चंडिकार्चनं तत्र कथं स्यादिति संशयः। कार
यित्व्यमन्येन देव्याः स्नानादिकं च पतत्। नरपन्निम्नसूतकं देव्याः कार्ये दर्ग्निहोत्रवत्॥ ११॥ इति नवरात्रति
थ्यपः॥ ॥

अथसंक्रांतिनिर्णयः॥ आत्रमेषादिद्वादशराशीनांचत्वारित्रिकाणिभवंति। तत्रैकस्मिंस्त्रिकेचर
स्थिरद्विस्वभावसंज्ञाभवंति। तत्रद्वादशराशिषु २।५।८।११ मितेगृहेराशौस्थिरराशौरवौसमा

गतेसवत्रैकेहरिपदंभवति। कर्कनेरवौसमायातेयाम्यायनंदक्षिणायनंभवति। मेषेतथातौलिनि
संक्रमेविषुवद्भवति। नक्रनेमकरगेर्केसौम्यायनंभवति॥ ३।६।९।१२ मितेराशिगेरवौ

द्विश्रेष्ठेशगृहेरवौहरिपदंयाम्यायनंकर्कगे॥
मेषेतौलिनिसंक्रमेचविषुवत्सौम्यायनेनक्रगे॥

द्विस्वभावराशौसंक्रमेषडशीत्यास्यंषडशीतिमुखंभवेत्। एतदुक्तंभवति। स्थिरराशिसंक्रांतीनांचत
सृणांहरिपदमितिसंज्ञा। द्विस्वभावराशिसंक्रांतीनांचतसृणांषडशीतिमुखमितिसंज्ञा। चरराशीनांम
ध्यान्मेषतुलासंक्रमौविषुवत्संज्ञौ। कर्कमकरसंक्रांतीयाम्यायनसौम्यायनेभवतः। तथाचज्योतिः
शास्त्रे। हरिपदंस्थिरभेरविसंक्रमपादितनुभेषडशीतिमुखंभवेत्। उदग्याम्यायनेमृगकर्कयोःक्रियतुला
धरयोर्विषुवन्मनमिति॥

कयोःस्त्वयनेद्वेविषुवेचतस्रःषडशीतयःचतस्रोविष्णुपद्यश्चसंक्रांतयोद्वादशस्मृताः॥ नक्रकर्क
टसंक्रांतीद्वेउदग्दक्षिणायने। विषुवतीतुलामेषेतयोर्मध्येततःपराः। वृषवृश्चिककुंभेषुसिंहेचैवयदा
रविः। एतद्विष्णुपदंनामविषुवादधिकंफले। कन्यामिथुनमीनेषुधनुष्यपिरवेर्गतिः। षडशीतिमुखी
प्रोक्ताषडशीतिगुणाफले। अत्रदानेफलमुक्तंकालिकापुराणे। अयनेकोटिपुण्यंचलक्षंविष्णुपदेफलं
।षडशीतिसहस्रंतुषडशीत्यांस्मृतंबुधैः। शतमिंदुक्षयेदानंसहस्रंतुदिनक्षये। विषुवेशतसाहस्रंव्यति

त्र्यंगाकार्कनगेरवौहिषडशीत्यास्यंहिसाधारणं॥

पातेत्वनंतकं। अत्रस्नानश्राद्धयोरकरणेप्रत्यवायस्मरणान्नित्यमवगम्यते। शातातपः। रविसंक्र
मणेप्राप्तेनस्नायाद्यस्तुमानवः। सप्तजन्मनिरोगीस्यान्निर्धनश्चैवजायते। अयनद्वितयेश्राद्धंविषुव
द्वितयेतथा। संक्रांतिषुचकर्तव्यंपिंडनिर्वपणादृतइतिब्राह्मपुराणवचनात्। सचकालःकिमुत
पूर्वतःकिंवान्यतरतःकियानित्यपेक्षायांहेतुमाह। सर्वसंक्रांतिषुसाधारण्येनाह। प्राक्तथापश्चात्षोड
शघटिकाःपुण्यतमाःसंमताः॥ ॥ ॥

का॰सि॰टी॰ ज्ञातातपः॥ अर्वाक् षोडश विज्ञेया नाड्यः पश्चाच्च षोडश। कालः पुण्योऽर्कसंक्रान्तेर्विद्वद्भिः परिकीर्त्तितः॥ मम
रीचिरपि। नाड्यः षोडश सर्वेषां संक्रान्तेरपरेण च। एतौ दृश्ये न मात्रेण पुण्यकालः प्रदर्शितः॥ तथा जावा
१०२ लिः संक्रान्तेः पुण्यकालस्तु षोडशोभयतः कलाः। ज्योतिःशास्त्रे। पूर्वतोऽपि परतोऽपि संक्रमात् पुण्यकालघ
कास्तु षोडश॥ अर्द्धरात्रसमयादनन्तरं संक्रमे परदिनेषु नावहे। केषांचिन्मते संक्रमो नयतः पंचदश
घटिकाज्ञपि च त्रने। संक्रान्तिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः॥ तद्योगाच्चाप्यधश्चोर्द्ध्वं त्रिंशन्नाड्यः पवि राम॰

आद्याः पुण्यतमाश्च षोडश कलाः पश्चात् तथा संमताः॥ २००॥

त्रताः॥ इति देवलवचनात्। एवं साधारण्येन संक्रान्तिकालो न वतः पंचदश षोडश घटिकाः कालत्र विशे १०२
षत्स्यते। मध्ये तु विषुवं पुण्यं प्राग्विशौ दक्षिणायने। षडशीतिमुखे तीतेऽप्यतीते चोत्तरायणे। याम्याय
ने विष्णुपदे तथा द्वौ ह्यध्ययनं तं विषुवे च मध्ये। वृहस्पती ने षडशीतिवक्त्रे महर्षयः स्वल्पमयने च सौम्ये॥ २ ॥१॥
त्यादीनि वाक्यानि संक्रान्तिनेदेन सर्वापरकालयोः प्रतिपादकानि॥ २००॥ ॥३॥

तत्रापि षट्कलनिघटिकास्तु पुण्यते॥ अपागयने दक्षिणायनगे रवौ विंशतिः प्राक् घटिकाः पुण्याः पुण्यदाः
स्मृताः। सौम्यायने मृगे केः पाश्चात्या विंशतिर्घटिकाः पुण्यदाः॥ अयने विंशतिः पूर्वा मकरे विंशतिः पराः इ
ति वृहस्पतिवचनात्। तु पुनः षडशीत्यास्य परतः कलाः षोडश घटिकाः पुण्याः स्मृताः॥ षडशीत्यामतीतायां षष्टिः प्रोक्तास्तु नाडि
क्रीरु क्रान्तदिका इति व्यासवचनात्॥ अष्टिरिति षोडश। षडशीत्यामतीतायां षष्टिः प्रोक्तास्तु नाडि

पुण्याः प्राक् घटिका अपागयनगे सौम्यायने विंशतिः॥ ॥
पुण्याः प्राक् घटिका अपागयनगे सौम्यायने विंशतिं॥ ॥
पाश्चात्याः परतः कलास्तु षडशीत्यास्येऽथ पूर्वापराः॥ ॥

काइति कैश्चिदुक्तं तत्रापि च तत्सर्वां पंचदश मिलिताः षष्टिरिति हेमाद्रिः॥ अथ विषुवे तुलामे
षयोः पूर्वापराः आद्यास्यादिति त्रिंशता नाड्यः पुण्याः स्मृताः॥ वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश
ति वचनात्॥ अथ हरेः पद्यां विष्णुपद्यां पुरा षोडश नाड्यः पुण्याः स्मृताः

का॰सि॰टी॰ केचित्तु नयोरपि षोडश नाड्यः पुण्याः स्मृताः॥ पुण्यायां विष्णुपद्यां तु प्राक्पश्चादपि षोडश इति वृद्ध
वसिष्ठवचनात्॥ केचित्तु कर्के मकरे वा द्विगुणिताश्चत्वारिंशद्घटिकाः पराः पुण्याः स्मृताः। त्रिंशत्
१०३ हे कर्किणि याम्यायने पुरस्तात् पुरोत्र वा त्रिंशद्घटिकाः पुण्याः स्मृताः। अतीतानागते पुण्ये द्वे उदग्
राम॰

॥ दृष्ट्वाप्यो विषुवे षोडश हरेः पद्यां पुरान्याश्च कै॥ ॥
॥ नैर्के द्विगुणिताः पराः त्रिंशत् हे त्रिंशात्पुरस्ताः स्मृताः॥१०२॥

ह्लिपायने। त्रिंशत्कर्कटगे नाड्यो मकरे तु दशाधिका इति। ब्रह्मवैवर्त्तवचनात्॥ एताः संक्रांतयः १०३
पूर्वापरत्वो गिन्यः संक्रांतयो यद्दिवा मध्याह्नादिषु नायं नेतत्सार्द्विवैवतत्वौदित प्रत्यस्तकालवशान्ना
त्सम्पगेव॥१०२

अथ रात्र्यागमे विशेषमाह॥ ॥ विषुवतीसंक्रांतौ मेषतुलासंक्रांतौ निशार्द्धद्वयोरात्रेः प्राक्पश्चि
मद्दले सत्यां प्राक्पश्चात् घुदलावधिः पुण्या घटिका उक्ताः। एतदुक्तं भवति॥ रात्रेः पूर्वार्द्धे संक्रा
न्तौ सत्यां प्राक्दिवसस्य परदलावधिर्मध्याह्नोत्तरं पुण्यकालः॥ रात्रेः पश्चिमार्द्धे संक्रांतौ सत्याप
श्चात्परदिनस्योदयान्मध्याह्नावधिः पुण्यकालः एवंविधे स न विषये पूर्वपरदिनमेव पुण्य॰

प्राक्पश्चाद्युदलावधिर्विषुवतीक्रांतौ निशार्द्धद्वये॥

कालः। वृद्धवसिष्ठः। अर्द्धरात्रादधस्तस्मिन्मध्याह्नस्योपरि क्रिया। ऊर्द्ध्वसंक्रमणे चोर्द्ध्वमुदया
न्यहरद्वये। आसन्नसंक्रमे पुण्यं दिनार्द्धं स्नानदानयोः। रात्रौ संक्रमणे भानोर्विषुवत्ययने
दिनमिति। यद्विपूर्वापररात्रौ विषुवत्संक्रमणं तदा संक्रमासन्नमहर्दलं पुण्यकालः॥ ॥ ॥

का॰सि॰टी॰ एवमयनेपूर्वापरदिनमपि॥ एवंचायनेकृतेविनाड्योबासुस्थिरद्विस्वभावसंक्रांतिषुनिशार्द्धध
येसतीषुक्रमात्पंचधुरिपराह्णोत्याद्यनाड्यः पुण्याः॥ एतदुक्तंभवति॥ निशार्द्धपूर्वार्द्धेषडशीतिवि
१०४ षुपद्योः सत्योधुरिदिनस्यांत्याः पंचनाड्यः पुण्याः निशापरार्द्धेतास्वक्षामुसंक्रांतिषुसतीषुपरदि

॥ शेषास्त्वेवमनेऽयनेधुरिपराह्णोत्याद्यनाड्यः स्मृताः॥ राम॰

१०४

नाद्याः पंचनाड्यः पुण्याः॥ विष्णुपद्योधनुर्मीनेनरयुक्स्यात्सुवैयदा॥ पूर्वोत्तरगतंरात्रौत्वा
नोः संक्रमणंभवेत्॥ पूर्वाह्णेपंचनाड्योस्याः पुण्याः प्रोक्तामनीषिभिः॥ अपराह्णेचपंचाद्याः श्रौते
स्मार्तेचकर्मणीतिवृद्धवसिष्ठवचनात्॥ ॥ ॥छ॥ ॥

अथनिशीथेव्यवस्था॥॥ अयनेकृतेशेषाद्वादशसंक्रांतयोयदारात्रिदलेनिशीथसमयेप्राक्पश्चिमा
यांतिथौस्युस्तदापूर्वाहिः॥ परवासरेदानमुख्यंव्याहुः॥ यदानिशीथेप्राक्तिथिक्षयासंक्रांतिस्तदाप्रा
क्रियेमध्याह्नोत्तरेपुण्यकालः॥ यदानिशीथेपरतिथिक्षयासंक्रांतिस्तदापरदिनेमध्याह्नावधिपु
ण्यकालः॥ तथाचदेवीपुराणे॥ ज्ञात्वापुण्यंविजानीयाद्यदिनास्तितिथिर्भवेत्॥ अर्द्धरात्रेव्यतीतेतु
पुण्यारात्रिदलेतथायनकृतेप्रा॥ क्पश्चिमायांतिथौ॥

विज्ञेयमपरेह्नीति॥ अस्यार्थः॥ अर्द्धरात्रेसंक्रमयोःपूर्वेदिनोत्तरार्द्धेवृत्तितिथ्यंतेनास्संक्रमका
लीनातिथिर्भवेत्॥ तदापूर्वदिनोत्तरार्द्धेपुण्यंविजानीयात्॥ एवंसतियदिनिशीथेपरदिनर
पूर्वार्द्धेतिथ्यंतेनासातदोत्तरदिनपूर्वार्द्धंमयास्तिसिद्धं॥

का.सि.दी. तत्रव्यवस्था॥ अर्द्धरात्रेऽतीतेऽहर्द्वेतिथ्यन्तरेऽपिपरेह्न्येव। यदार्द्धरात्रसंक्रमकालीनातिथिर्दि-
नार्द्धव्यापिनिभवतितदापूर्वयोगिनीषु॥ पूर्वेद्युर्नोत्तरार्द्धे। परयोगिनीषुउत्तरदिनपूर्वार्द्धे॥ उ-
१०५ भयतोयोगिनीषुछायातोविकल्पः। केचित्तु॥ अस्मिन्विषयेसंक्रमस्तुनिशीथेस्यात्तदूर्ध्वा माः

पूर्वाह्नेपरवासरेपुण्यमुक्तंकेऽप्याहुरर्द्धयोः॥१०२॥ राम.

पूर्वपश्चिमाः। संक्रान्तिकालोविज्ञेयस्तत्रस्नानादिकंचरेदिति। केचिद्दिनद्वयेपुण्यमाहुः॥ १०५
। वृद्धवसिष्ठः। पूर्वोचेदर्द्धरात्रेतुयदासंक्रमतेरविः। प्राहुर्दिनद्वयेपुण्यंमुक्त्वामकरकर्कटौ॥
विति।२०२

अथायनेविशेषमाह॥॥ रात्रौयदाकदापिकर्कटसंक्रमेसतिधुरिदिनस्योत्स्याहर्पुण्यं। तत्रस्यात
स्पदिनस्योत्स्याःपंचघटिकाःपुण्यतमाः। विशेषेणपुण्यदाइति। तथानिशिमृगेमकरसंक्रमेय
दाकदापिसति। अस्याहस्तस्याद्यपूर्वार्द्ध। तदाद्यास्तस्यपूर्वाःपंचघटिकाःपुण्यतमाविशेषफलदा
॥ तथाचवाचस्पतिः। निशीथादुत्तरस्मायिकर्कटेदिनोदयात्॥ जातेपरदलेपुण्यंपूर्वस्यांहस्तथा

रात्रौकर्कटसंक्रमेधुरिदिनोत्स्यार्द्धतदंत्याःशराःधटाःपुण्यतरामृगेति
शीतयात्याहाद्यमाद्याःशराः॥ नाद्यस्पुण्यतमाहिकेचिदयनक्रान्तौतुरा
अतणःकालासन्ननएवदृष्टफलदःक्रान्तौपुरापुरावपरे॥ १०२॥ ॥

कषेःऽन्यदर्द्धरात्रात्सूर्वमपिस्वर्योस्त्रमयतःपरं॥ जातेपूर्वेद्युर्दलेपुण्यंपरस्यान्तस्तथापरयोः॥ पूर्वेन्त्ररहितो
स्याद्यंपंचनाड्यस्तथोत्तमाइति। नविष्णोन्तरे। मिथुनात्कर्कसंक्रान्तिर्यदास्याद्रश्मिमालिनः। प्रजाते
वानिशीथेवाकुर्यादहनिपूर्वकः॥ कामुकंतुपरित्यज्यमकरेयातिभास्करः॥ ॥

का॰सि॰टी॰ प्रदोषे चार्धरात्रे वा स्नानं दानं परेऽहनि॥ अर्धरात्रे तदूर्ध्वं वा संक्रान्तौ दक्षिणायने॥ पूर्वमेव दिनं ग्रा
ह्यं यावन्नोदयते रविरिति॥ अन्यत्रा। अयनसंक्रान्तौ कर्कमकरसंक्रान्तौ केचिदाचार्या रात्रीमध्ये एव
१०६ स्नानदानाद्याहुः। कर्करे कर्कटे रात्रावप्याचारात्तुष्टिरिति माधवः। गोभिलः। राहुदर्शनसंक्रान्ति
विवाहात्ययवृद्धिषु। स्नानदानादिकं कुर्युर्निशि काम्यव्रतेषु च। मनुः। ग्रहणोद्वाहसंक्रान्तियात्रार्त्ति

मार्त्तण्डोदयतः पुरादिकलसंक्रान्तौ तु सूर्योदयात्॥॥
पुण्यं स्यात्तदपूर्वपूर्वसमये श्राद्धस्य कालः स्मृतः॥ रामु॰

प्रसवेषु च। अत्र वपोचेतिहासस्यपरात्रौ दानं प्रशस्यते॥ तुषुनर्यदोत्तरनोगसंक्रान्तौ सूर्यास्तान्ततए
वसमयः वाहर्वं नोगसंक्रान्तौ मार्त्तण्डोदयासन्न एव समय स्नानदानाद्युत्तरकालयोः स्नानदाना १०६
दि स्यात्। तथा च कालतत्त्वविवेके। यदा तु पूर्वं नोगिस्यदूर्ध्वं समनन्तरं॥ रवेरुत्तरनोगिस्याहस्तादू
र्ध्वं च। ज्ञायते तत्र सामान्यवचनप्रामयोरपि। कालयोरुत्तर प्राचीर्यदहः स्नानादिकर्मस्विति॥॥

अथ वारर्क्षवशात्संक्रान्तिनामान्याह॥ ॥क्रूरनेषु तथा सूर्यवारे या संक्रान्तिस्तन्नाम घोरेति॥ लघुउ
षु तथा शनिदिने ध्वांक्षीति नाम॥ चरने चरधिष्ण्ये क्षोणीजे तोमवासरे माहोदरीयुता महोदरीति ना
म॥ मृदुक्षे मृदुनक्षत्रे तथा सोमने बुधवारे मंदाकिनी संक्रान्तिः। ध्रुवनेषु जीववारे मंदासंक्रान्तिः

॥ घोरा क्रूरनसूर्ययोः शनिदिने ध्वांक्षी लघुर्क्ष्वपि॥॥
॥ क्षोणीजे चरने महोदरयुता मंदाकिनी सोमने॥ १०३॥

॥ न्नगा शुक्रवारे मिश्रने मिश्रा संक्रान्तिः॥ तीक्ष्णनेषु सूर्यसूनोः शनेर्दिवसे बुधैः क्रान्तिः सं
क्रान्तिः राक्षसीति निगदिता। यदा तु प्रोक्तनवारयोगसंक्रान्तिस्तदा तु न देव घोरादिकं नाम यदा वा
र्क्षनेदस्तदा वारवशाद्भिन्नं नाम नक्षत्रवशाद्भिन्नं न भवति॥॥

का॰सि॰टी॰ अथक्रूरध्रुवादिसंज्ञा नक्षत्राणां ज्योतिःशास्त्रे प्रसिद्धा॥ तथाचोक्तं॥ स्वात्यादित्यहरित्रयं चरचलं धात्रोत्तरा
ध्रुवास्थिराः क्रूरोग्रंपित्र्यद्विविशाखान्तकमथ दीशानले मिश्रके। हस्तोस्याश्व्यभिजित्क्षिप्रं मृगशिरश्चित्रान्त्यमै
१०७ त्रमृदुस्त्वेशार्द्रोरगमूलपेतद्दिनेतीक्ष्णाख्यानारतः॥ एतदुक्तं नामसप्तकं शशीरनः सूर्यः आरोन्नो
मस्तक्रमेणार्हेयं। शशीचरः रविवारो ध्रुवः भौमः क्रूरः सौम्योमिश्रः जीवो लघुसंज्ञः शुक्रोमृदुसंज्ञः। श

शन्यहश्चेध्रुवजीवयोर्निगदिता मंदान्नगौमिश्रत्वे॥ ॥ राम॰
मिश्रातीक्ष्णान्सूर्यस्तु दिवसे क्रांतिर्बुधे राक्षसी॥ ॥

नित्तीक्ष्णाः अथासांसंक्रांतीनांनामानि ग्रंथांतरेष्वपि॥ ज्योतिःशास्त्रे सूर्यघोराविधौध्वांक्षीनौमवारे १०७
महोदरी॥ बुधेमंदाकिनी नाम मंदासुरपुरोहिते। मिश्रि॥ मिश्रिताशुक्रवारेस्या राक्षसी चन्द्रनैश्चरे। मंदा
ध्रुवेषुविज्ञेया मृदौ मंदाकिनी तथा क्षिप्रध्वांक्षी विज्ञानीयान् घोरा क्रूरे प्रकीर्तिता। चरे महोदरी ज्ञेया
तीक्ष्णाक्षे तु राक्षसी॥ मिश्रिता चैव निर्दिष्टा मिश्रधिष्ण्येषु संक्रमादिति॥ ॥ ॥ग॥ ॥

अथासांसंक्रांतीनां बवादिकरणवशाद्वाहनानि संति॥ तानि यथा। सिंहव्याघ्रेत्यादि। बवतः एकादशासु
करणेषु रवेः संक्रमे वाहनक्रमात्के॥ बवे सिंहः। बालवे व्याघ्रः। कौलवे वराहः। तैतले रासभः। गरे व
गजः। वणिजि कालीसुतो महिषः विष्टौ क्रमादुष्ट्रः शकुनिकरणे श्वा कुक्कुरः॥ चतुष्पदे नः छा

सिंहव्याघ्रवराहरासभगजाः कालीसुताश्चोक्रमात्॥
श्वाजोगोः खलु कुक्कुटाश्च बवतो वाहा रवेः संक्रमे॥ २०४

गः॥ नागे गौर्वृषनाः किंस्तुघ्ने कुक्कुटः॥ तथाच ज्योतिःशास्त्रे॥ सिंहो बवे गरे हस्ती व्याघ्रो बालवसंज्ञ
के वाराहः कौलवे वाहो माहिषो वणिजाह्वये। रासभस्तैतिले विष्टावश्वः श्वानकुनौत्वनः। चतुष्पदे वृषो
नागे किंस्तुघ्ने कुक्कुटो रवेः। वाहनानि बवाद्येषु नाम्नास्त्युद्दंतिनाविनामितिः॥२०४॥ इतिनिर्णयसिद्धान्ते र
वीसंक्रमणकालनिर्णयः॥॥

का·सि·टी· अथान्यग्रहसंक्रमणास्नानदानकालः॥ ॥खचरस्यचंद्रादियहस्यसंक्रमणेरश्यंतरप्रासौप्राक्पश्चाद्वि
स्रमायानाडिकाः पुण्यप्रदाः प्रोक्ताः। ताः काः विधैः संक्रमणात्प्राक्पश्चाद्विघमिताः त्रयोदशपलाः ध
१०८ टिकैकास्नानार्चनेपुण्यप्रदाः। एवंक्षितिसुतस्य भौमस्य च तस्त्रोघटिकाः। इंदुतस्य बुधस्य सांघ्रयः सपादाः त्वि
स्रोनाड्यः। गुरोः सार्द्धाब्धयोर्द्धाब्धचतस्रोनाडिकाः। शुक्रस्याघिमितिनाश्चतस्रोनाडिकाः शनेरेवंबोदशनाड्यः

प्राक्पश्चात्खचरस्यसंक्रमणातः पुण्यप्रदानाडिकाः॥ राम·
त्र्येकाब्धिस्वपलाविधोः क्षितिसुतस्यैवंचतस्रोमताः॥ ॥

पुण्यप्रदाः। अत्रकालेस्नानमर्चनं ग्रहाणां तुष्टयेनवति। प्राक्पश्चादितिसर्वत्रानुषज्जति। तथा च नैमुनिः॥ १०८
नक्षत्रराश्योरविसंक्रमेस्युर्वाक्परत्रापिरसेदु॥ रुद्रानाड्यः पुण्यपास्तथैदोस्त्रिधरा। रपलैर्युगैकैर्वनाजी
मुनिर्तिः शुतोक्ताः नाड्यश्चतस्रः सपलाकुजस्य बुधस्यतिस्रो मनवः पलानि। सार्द्धाश्चतस्रः सुपुण्याः अत्रैना
चनेस्त्र्यर्धापलसमयुक्ताः गुरोश्च शुक्रेसपलाश्चतस्रः द्विर्नागताश्च पलसमयुक्ताः शनेश्चरस्यचिहिताः सुपुण्याः अ
त्रदानार्चनेस्त्र्योदि ग्रहाणांतुष्टयेसेनोपायनवतः॥

वेश्मुनायनवंति। तदुक्तं
एतदुक्तंनवति॥ गोचरे ग्रहादुःस्थानवंति। तदादानं रूज्जनंच त्रेय्येतेन तुष्ट
ज्योतिःशास्त्रे। नानाविधैः सत्कृपहोमदानैर्ग्रहोप्यसर्वे दुरितं प्रलश्येतरतिनत्राद्दौसूर्यक्रमणेदानान्युक्ता
निसंतितानिसामान्यतोयथाविश्वामित्रः। मेषसंक्रमणेनानौर्गावेषदानेमहाफलं। वृषसंक्रमणेप्रोक्तं गवोदाने
तथैव च। वस्त्रान्नपानदानानिमिथुनेर्थैहितानि च। धनधेनुः प्रदानंस्यात्कर्कटेपिविशेषतः। ससुवर्णेछत्र
दानेसिंहेपिविहितंसदा। कन्याप्रवेशेवस्त्राणांवेश्मनांदानमेवच। तुलाप्रवेशेतैलानांगोरसानांमहाघतां।

तिस्रः सांघ्रयरंदुतस्य च गुरोः सार्द्धाब्धयोनाडिकाः॥

वृश्चिके च तिलैनानोदीपदानंमहाफलं। धनुःप्रवेशेवस्त्राणांयानानांचमहाफलं। झषप्रवेशेदार्क
दानामग्निस्थैवच। कुंभप्रवेशेदानेनुगवांमेघघटस्यच॥ मीनप्रवेशेस्यानानांमालामध्यदापनंविति
एतानितुपुण्यानिकृत्यानि। अथ भौमादयोदिप्रदेरुःस्थेश्वानांकार्योदानेकार्यं। तथया। जातकाभरणे। माणि
क्यगोधूमसवत्सधेनुःकौसुंभवस्त्रगुडहेमताम्रं। आरक्तकंचंदनमंबुजंचवदंतिदानेहिविरोचनाय॥१॥
सत्कांस्यपात्रस्थितसितंदुलां

श्वकर्पूरमुक्ताफलशुभ्रवस्त्रं।युगोपयुक्तंवृषभंसरौप्यंचंद्रायदद्याद्घृतपूर्णकुंभं॥२॥प्रवालगोधूममसू
रिकाश्चवृषोरुणश्चापिगुडःसुवर्णं।आरक्तवस्त्रंकरवीरपुष्पंताम्रंहिभौमायवदंतिदानं॥३॥चैलंचनीलं
कलधौतकांस्यंमुद्गाज्यगारुत्मतसर्वपुष्पं।दासीचदंतोद्विरदस्यनूनंवदंतिदानंविधुनंदनाय॥४॥शर्क
राचरजनीतुरंगमःपीतधान्यमपिपीतमंबरं।पुष्परागलवणंचकांचनंप्रीतयेसुरगुरोःप्रदीयतां॥५॥चित्रांब
रंशुक्लतरस्तुरंगोधेनुश्चवज्रंरजतंसुवर्णं।सुतंडुलान्नोत्तमगंधयुक्तंवदंतिदानंभृगुनंदनाय॥६॥माषाश्च

शुक्रस्याद्विमिताश्चषोडशसंख्यानैर्दानार्चनेतुष्टये॥२०५॥

तैलंविमलेंद्रनीलंतिलाःकुलित्थामहिषीचलोहं।सदक्षिणंचेतिवदंतिनूनंदुष्टायदानंरविनंदनाय
॥७॥गोमेदरत्नंचतुरंगमश्चसुनीलचैलानिचकंबलश्च।तिलाश्चतैलंखलुलोहमिश्रंस्वर्भानवेदानमिदं
वदंति॥८॥वैडूर्यरत्नंसतिलंचतैलंसुकंबलंचापिमदोमृगस्य।शस्त्रंचकेतोःपरितोषहेतोषहेतोरुदीरि
तंदानमिदंमुनींद्रैः॥९॥दानांतेदक्षिणादेया।तथाचवासिष्ठः।धेनुःशंखस्तथानड्वान्हेमवासोहयःक्र
मात्।कपिलागौरायसंछागएतावैदक्षिणाःस्मृताः॥२०५॥ ॥ इतिग्रहसंक्रमनिर्णयः॥ ॥ ॥

अथग्रहणकालनिर्णयः॥ ॥ सूर्येन्दोर्ग्रहयोग्रासेसर्वमप्यंबुगांगजलवत्।गंगायास्त्वंगांगंचतज्जलंततु
स्पर्शित्यर्थः।तथाचकात्यायनः।स्वर्धुन्यंभःसमानिस्युःसर्वाण्यंभांसिभूतले।कूपस्थान्यपिसर्वत्रग्रहयोश्चंद्रसू
र्ययोरिति।सूर्येन्दुग्रहणयाकालेसर्वेवाडवाःव्यासोपमाःचेद्व्यासतुल्याइत्यर्थः।सर्वंगंगासमंतोयेसर्वेव्याससम
माद्विजाः।सर्वंभूमिसमंदानंग्रहयोश्चंद्रसूर्ययोरिति।अथस्पर्शेस्नानंकार्यं।अंतरामंतोऽपहवनेहोमादि
मुच्यमानेःपर्वदानंदेयं।विमुक्तौस्नानंचस्पर्शेस्नानंनवंकुर्यान्मध्येहोमंसुरार्चनं।मुच्यमानेसदादानंवि

सूर्येन्दोर्ग्रहयोरंबुगांगजलवद्व्यासोपमावाडवाः॥

मुक्तौस्नानमाचरेदिति।मुच्यमानेसदादानमित्युक्तेग्रहणेदानस्यनित्यताप्राप्ता।तत्पात्रेचासत्पात्रेप्या
वश्यकं।नपात्रापात्रविवेकोपि।बौधायनः।अश्रोत्रियःश्रोत्रियोवापात्रंवापात्रमेववा।विप्रब्रुवोपिवा
विप्रोग्रहणेदानमर्हति।दक्षस्मृतौ।सममब्राह्मणेदानंद्विगुणंब्राह्मणब्रुवे।श्रोत्रियेशतसाहस्रंपात्रेत्वा
नंत्यमश्नुते।अब्राह्मणोनातिमात्रब्राह्मणःसंस्काररहितः।ब्राह्मणब्रुवस्तु।गर्भाधानादिसंस्कारवे
दोपनयनैर्युतः॥

का·सि·टी· नाध्यापयति नाधीते स न वै श्राद्धस्य पावनः। श्रोत्रियः सर्वसंस्कारः सर्वकर्मा वेदाध्ययनवान्। पात्रं तत्कथ्यते व
त्केन॥ न विद्यया केवलया तपसा वापि पात्रता। यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्त्तितमिति। अत्र श्राद्धाक
११० रणे प्रत्यवायः स्मर्यते। सर्वस्वेनापि कर्त्तव्यं श्राद्धं वै राहुदर्शने। अकुर्वाणस्तु नास्तिक्यात्पंके गौरिव सीद
तीति महाभारतवचनान्नित्यत्वाद्ग्रहणकाले श्राद्धमामेन हेम्ना वा कर्त्तव्यं। तथा चोक्तं। कात्यायनेन। अन्ना
पद्यनग्नौ तीर्थे च चंद्रसूर्यग्रहे तथा। आमश्राद्धं प्रकुर्वीत हेमश्राद्धमथापि वा। तत्र पिंडदाने नियममा

स्य ग्रहस्नानमथांतराहवनकं स्यान्मुख्यमाने पर्वणां॥ राम·

ह। दासी दासी सुतो वा न वति यदि कुले मित्रपुत्रोपि तस्य कुर्यात्पिंडप्रदानं ग्रहणमुपगते नास्क
रेश्रीतगौ वा वो छन्नक्षीयाल्लोकान्सपदि च पितरः किं पुनः पुत्रपौत्रास्तस्मात्कुर्वीत पिंडं गुडसहितं त ११०
तिलैः किं कृतैः कोष्ठि पितृतेरिति मरीचिः। तत्र चंद्रोपरागे रात्रावपि श्राद्धं कर्त्तव्यमित्याह। रात्राववश्यं त
स्येति। रात्रौ अलीतस्यापि दिवा श्रुतस्यापि पितृयत्ननं श्राद्धमुक्तं। संध्यारात्रौ न कर्त्तव्यं श्राद्धं खलु विचक्षणैः

क्षयोरपि चक्षुत्तेव्य यदि स्यार्हदुर्दर्शनमिति शातातपवचनात्॥ मुक्ते स्नाने विधीयत इति वचनान्मुक्तौ स्नानं
तु नित्यमेव कार्यं। ग्रहणयोश्चावमाशौचं विमुक्तौ सौतिकं स्मरते। तयोः सपत्निमात्रे पाजपः स्थूपक्रियाक्रम
तं॥ विमुक्तौ यदि न स्नायाद्ग्रहणे चंद्रसूर्ययोः। तस्य तावद्भवेच्छौचं यावदस्यापरो ग्रह इति॥ प्रवृत्तस्यैव
त्वं वचनादुत्तरतः सचेलस्नानमावश्यकं। ग्रहणकाले यो न श्रावाशौचसत्वेपि स्नानादि कर्त्तव्यमी

रात्राववश्यं तस्य पितृयत्ननं चंद्रोपरागे स्मृतं॥

स्याद्गु। स्नानं स्नानमथैतयोरिति। एतयोश्चंद्रसूर्योपरागयोर्योने स्नानकाशौचे शावे मृताशौचे सस्य
पि स्नानं स्नानं च श्राद्धमपि तद्वदेव। तदुक्तं लिंगपुराणे। चंद्रसूर्यग्रहे स्नायात्सूतके मृतके पि वा। अस्ना
यी मृत्युमाप्नोति स्नायी मृत्युं न विंदति। सूतके मृतके चैव न दोषो राहुदर्शने। तावदेव भवेच्छुद्धि
र्यावन्मुक्तिर्न दृश्यते। यद्यपि ग्रहणे सामान्यस्नानमुक्तं तत्र विशेष उच्यते। वापीकूपतडागेषु गिरिप्रस्रवणेषु च॥

का॰ सि॰ टी॰ नद्यां नदे च स्नाते सरसीश्वथ तो बुनि उष्णोदके पि वा स्नायाद्ग्रहणे चंद्रसूर्ययोरिति ऋषिवचनात्। उद्धृतादु
द्धृतोद्धृत प्राप्तस्य मुख्यं। तत्र मार्कंडेयः। भूमिष्ठमुद्धृतात्पुण्यं ततः प्रस्रवणोदकं। ततोपि सारसं पुण्यं ततः पु
१११ ण्यं नदीजलं। तीर्थतोयं ततः पुण्यं महानद्यंबु पावनं। ततस्ततोपि गंगांबु पुण्यं स्यादब्धितो बुधे। शीतमु
ष्णोदकात्पुण्यं मपारक्यं परोदकादिति। व्यासः। सूर्यचंद्रग्रहे चैव योवगाहेत जाह्नवीं। स स्नातः सर्वतीर

स्नाने दानमथैतयोर्निगदितं शावेपि यौने सति॥ २०६॥ राम

र्थेषु किमर्थमत्र तेमहीनिति। यदुष्णोदकेन स्नानमुक्तं तदातुरविषयमेव। तत्र व्याघ्रः। आदित्यकि
रणैः पूतं पुनः पूतं तु वह्निना। क्षते व्याधितु न स्नायाद्ग्रहणेप्युष्णवारिणेति। यमोपि। न तेजस्वनि संक्रां १११
तौ ग्रहणे चंद्रसूर्ययोः। अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणेति॥ ६॥

अथ ग्रहणे दृष्टेऽदृष्टे विचारः॥ ॥ यदि वारिदो मेघस्तेन वान्येनापि पिहितमाच्छादितं चंद्रसूर्यग्रहणं नोद
ष्टं दृग्गोचरीभूतं तेन तदा स्नानवादि स्नानाद्यं न स्यात्। तत्र मार्कंडेयः। चंद्रे वाथ दिवा सूर्ये दृष्टे रात्रौ महाग्रहे
अदृश्ये कथितं पुण्यं तत्रार्के तु विशेषत इति। अत्र दृष्टादृष्ट इति चाक्षुषव्यापारः। न तु शास्त्रादितो वा
प्तिः। तथा सति रात्रौ सूर्यग्रहे दिवा चंद्रग्रहे शास्त्रादवगतेपि स्नानं न विधेयं। तत्र षट्त्रिंशन्मते। सूर्यग्र

नो दृष्टे यदि वारिदाद्यपिहिते तत्रास्नवाद्यं न वा॥

होयदा रात्रौ दिवा चंद्रग्रहस्तथा। तत्र स्नानं न कुर्वीत दद्याद्दानं च न क्वचिदिति। अंधस्य तथा स्यादे
वा। तत्रोच्यते। वास्तवादेव। तद्वशादेव दर्शनाभा
वे। अंधस्य दृष्टेरभावान्न स्नानादि न स्यात् इति कश्चन। दर्शनस्य पक्षे प्राप्तत्वात्॥॥
करणानस्यांगत्वे। तथापि सोऽदर्शनाबुद्धिस्नानचन्न संनवतिनिमित्तता न तयादर्शनस्य पक्षे प्राप्तत्वात्॥

का. सि. टी. किंतर्हि निमित्तत्वानस्याधिकारसंपादकस्यानेकरूपस्य सेनवास्य होमस्य दर्शनस्य नियमविधिरयं अव
घातादिविधिवत्। ततश्च नैमित्तिके ग्रहणस्नानगृहीनेनाप्यधिकारस्यायसिद्धत्वादंधानां मेघाद्यावरणे
१२२ चाशक्यदर्शने नियमरूपांगासेनवेपिस्नानायुक्तमिति। नेष्टहानिः ग्रहणांतरिते सर्वपक्वमन्नेतत्त्सो
क्तव्यमित्याह। ग्रहणेनसमये सर्वपक्वमन्नंसदैवोक्तेन। वसिष्ठः। सर्वेषामेव वर्णानां सूतकं राहुदर्शने॥ राम.

स्याद्धंध स्पतथाग्रहणांतसमयेन्नंपक्वमुत्सृजेत्सदा॥

सचैलं चन्नवेत्स्नानं स्नूतकान्नं च वर्जयेत्॥ स्नात्वा कर्माणि कुर्वीत शृतमन्नं विसर्जयेदिति वचना १२२
त्। तत्र क्वचित्क्वचित्प्रतिप्रसवमाह। आरनालं तथा क्षीरं घृतं कीलाटसंभवं। स्नेहपक्वं च तैलं च सूक
हालिन्नापि दुष्यति॥ आरनालं च तक्रं च यद्धान्यं घृतपाचितं॥ उदकं च कुशाच्छन्नं न दुष्येद्राहुदर्शने रति
॥ अथ ग्रहणकाले सर्वं ग्रहणकालेवा नोत न निषेधमाह॥ ॥ ॥नु॥ ॥

सौराद्यामेति। सौरात्सूर्यग्रहणात्पूर्वं यामचतुष्टये भुंजीत नैनं स्यात्। चांद्रग्रहे प्रहरास्तु त्रियामे भुंजि
र्नं। तदुक्तं महाभारते। अर्वाग्यामचतुष्टयादिहोर्ग्रहणे भुंजिमाचरेत्। चतुर्यामान्ग्रहश्चैव राहुग्रस्ते दिवाकरे॥ वृ
द्धवसिष्ठोपि। सूर्यग्रहे पि नाश्नीयात्पूर्वं यामचतुष्टयं। चंद्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरान्विना। तत्र बा
लादीनां विशेषमाह। अह्नि पंच निशामे दिनमाने पंच नि चंक्रेयो नागस्यादशक्तस्य नागद्वयं वा सार्धं वृद्धेषु
ज्ञिनं स्यात्। अन्ये च सर्वत्रि नागे बुस्याद्वेवा अन्नौ बालः। तथा च मार्कंडेयः। सायाह्ने ग्रहणं चेत्स्यादपराह्णे न भो

सौराद्यामचतुष्टये न हि भुंजिश्चांद्रे त्रियामे पुरा॥ ॥
स्नासेपं च निरेत्य नागयुगलं वृद्धातुरान्नादिषु॥ १०७ ॥॥

सायाह्ने ग्रहणं चेत्स्यादपराह्णे न भोजनं। अपराह्णे न मध्याह्ने मध्याह्ने न तु संगवे। भुंजीत संगवे चेत्स्यान्न पूर्वं भुंजिमाचरेदिति। अस्यार्थः। सायाह्ने ग्रहणे चेत्संगवे तु
नने। अपराह्णे न मध्याह्ने मध्याह्ने न तु संगवे चेत्तुरीत संगवे चेत्स्यान्न पूर्वं। मध्याह्ने भोजननिषेधः। मध्याह्ने ग्रहणे चेत्संगवे तु
चेत्ग्रहणं। अपराह्णे भोजननिषेधः। अपराह्णे ग्रहणं चेत्तदा मध्याह्ने भोजननिषेधः। ग्रहणकाले भोजने ब्रह्मपुराणवचनं। नाश्नीयाद्ग्रह
णे ग्रहणकाले भोजननिषेधः। सा चेद्ग्रहणं चेत्ग्रहणानंतरं भोजनमिति। ग्रहणकाले भोजने ब्रह्मपुराणवचनं। ना श्नीयात्स्य
निषेधः। संगवे ग्रहणे ग्रहणानंतरं भोजनमिति। ग्रहणकाले भोजन निश्चिवेशमनानिपरान्न भोजन निषेधः
॥७॥ ॥
तत्काले ग्रस्तयोश्चंद्रसूर्ययोः। मुक्तयोश्च कृतस्नानः पश्चाद्भुंजीत स्वचेश्मनीति

का॰सि॰टी अथ ग्रस्तोदयग्रस्तास्तयोर्निर्णयमाह ॥ ॥ ग्रस्तश्चासाविंदुश्च तस्य समुद्गमे समुदयोर्दिने स्वर्वदिने न
भुंजितः ॥ तमसे शेषे मुक्तेः परानंतरं भुक्तिर्न भवति। तरणोः सूर्ये ग्रस्ते ऽस्ते ऽस्तमिते दिवानिशामहोरात्रमभुक्ति
२२३ र्भोजनाभावः ॥ अपराह्णे ऽन्येद्युर्भुक्तिर्भोजनं हिमगौ चंद्रे ग्रस्ते ऽस्ते स्वपिते दिने ग्रासास्तास्तानंतरदिने ऽ
निरग्रात्रे ॥ दृष्टे विधौ भोजनमिति। तदुक्तं ज्ञानानपेग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेत्। ग्रस्तावेवा

ग्रस्तेशोश्च समुद्गमे न हि दिने भुक्तिस्ततो मुक्तेः परं ॥ सप॰
ग्रस्ते स्तेतरणोर्दिवानिशमिहाभुक्तिः पराह्णे भुजिः ॥

स्तमानं तु रवींदु प्राप्नुतो यदि। तयोः परेद्युरुदये स्नात्वाभ्यवहरेन्नर इति। यत्तु वचनं। यायाह्ने संगवे श्री
याब्दे संगवोदधः ॥ मध्याह्ने परतो ऽश्रीयाज्ञोपवासो रविग्रहे। ग्रहणप्रहरात्याक् प्रथमे कं ग्रहणात्प्र २२३
हणात्पश्चात्प्रहरमेकं त्यक्त्वा भुंजीतेत्येतत्पुत्रवद्विषयमेव। संक्रांतावुपवासं च कृष्णैकादशीवासरे ॥
चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान्गृही इति नारदवचनात् ॥ ॥ ॥७॥ ॥

यत्तु चंद्रग्रस्तोदये मुक्तो भोजनं तन्महानिशातः पूर्वं द्रष्टव्यं। मुक्तौ रात्रिविभुंजी। तयदिनस्याभ्यर्हानिशे
ति। अन्नातपवचनात्। चंद्रे ग्रस्ते ऽस्ते बालादीनां विशेषमाह। बालाद्येषु दिनाक्षस्त्रागकरयोर्मुक्तेस्त्रिना
गे भुजिरिति। दिनस्य दिनमानस्याक्षस्त्रागकरयोः पंचधा विभक्ते दिने मुक्तितस्त्रिनागे बालादीनां भुजिः
स्यात्। एतदुक्तं भवति। चंद्रे ग्रस्तास्ते यावदुदयकालमभोजने नावस्थातुमसमर्थानां बालादीनां रात्रौ

ग्रस्तेस्ते हिमगौ दिने निरशनं दृष्टे विधौ भोजनं ॥ ॥
बालाद्येषु दिनाक्षस्त्रागकरयोर्मुक्तेस्त्रिनागे भुजिः ॥२०८

स्त्रावग्रमभुक्तिकालन्यूनाहर्भोगोत्तरं नागद्वयमेकनागं वा त्यक्त्वा भोजनं भवति। एवं बालादीनां रा
त्रिप्रथमद्वितीययामागते चंद्रग्रहे रात्रेरपि पेचनामान्न्यूक्त्वा ग्रहणकालन्यूनतनागावधिकत्रिमु
हुत्वान्यकेकनाग एव रविग्रहणे व भोजननिषेधकालो द्रष्टव्यः ॥ २०८ ॥

का॰सि॰टी॰ चंद्रग्रहे तु यामांस्त्रीनित्येतद्वचने विशेषमाह॥ रात्र्याद्यार्द्धग्रासिग्रहे पुराहर्द्दले दिनस्य पूर्वार्द्धमध्ये नो
जनमित्यर्थः॥ रात्रेः परद्दले ग्रासिग्रहणे यावत्त्रिप्रहरं दिवसस्य तृतीयप्रहरं यावद्भोजनमिति ग्रहणा^
२२४ च्चनवेदिद्दोः प्रथमाद्यार्द्धयामतः॥ तुर्त्तीतावत्त्रेनान्हेवं प्रथमे प्रथमाद्दथ इति मार्कंडेयवचनात्॥ अ
स्यार्थः॥ प्रथमयामाद्यार्द्धरात्रिद्वितीयप्रहरे चंद्रग्रहणे तस्य वेधिको रात्रिप्रथमः प्रहरकः॥ आवर्त्तेनोत्तरका राम॰
लीने च दिनसंबंधितृतीयचतुर्थात्मकं प्रहरद्वयमेतत्प्रहरत्रयेण नोक्तव्यं॥ रात्रिप्रथमप्रहरे ग्रहणे त

॥ रात्र्याद्यार्द्धग्रासिग्रहे॥ ॥

स्मिन्दिनसंबंधिन्येव द्वितीयतृतीयचतुर्थात्मके प्रहरे न नोक्तव्यमिति॥ पद्मपुराणेपि॥ अर्द्धरा २२४
त्रादधश्चोर्द्ध्वं यदा चंद्रग्रहो भवेत्॥ पूर्वेद्युः सर्वत्र नोक्तव्यं सुत्तरे चोत्तरेपि वेति॥ अधो मध्यरात्रादधः
प्रथमद्वितीयप्रहरे॥ ऊर्द्ध्वं तृतीयतुर्यप्रहरे॥ पूर्वेत्र पूर्वान्हे प्रथमद्वितीयप्रहरयोः॥ उत्तरे रात्र्यपरार्द्धे॥
उत्तरे दिनोत्तरस्मिन्न तृतीयप्रहरे एव॥ नोक्तव्यमित्यर्थः॥ ग्रहणसमये तत्पूर्वापरकाले च नोजनने कृते प्रायश्चित्तमाहः
॥ ॥

पत्येन शुद्धिः॥ पूर्वापरनिषिद्धकाले नोजनने कृते तदर्द्धजनर
ग्रहणे काले तु नो नोजनने कृते कृच्छ्रः प्राजापत्येन शुद्ध्यति॥ तस्मि
न्पूर्वे प्राजापत्ये कृते शुद्धिरिति॥ तथा च षट्त्रिंशन्मते॥ चंद्रसूर्यग्रहे तु कृत्वा प्राजापत्येन शुद्ध्यति॥ तस्मि
न्नेव दिने तु कृत्वा त्रिरात्रेणैव शुद्ध्यति ग्रहणोत्तरनिषिद्धकाल कृत्यस्मात्ल विषयः॥ बालादीनां तदर्द्धं॥ इति
ग्रहणे नोजनननिर्णयः॥ अथ ग्रहणे पुरश्चरणं॥ अथो ग्रासपूर्वदिने ति॥ ग्रास पूर्वदिने उपोष्य ग्रहणादि
दिनेस्पर्शाद्दारस्य मोक्षांतं जपाद्दुपस्थाने पुरश्चरणं जायते॥ ग्रहणे र्कस्य वेदो वा शुचिः पूर्वमुपोषि
नेस्पर्शाद्दारस्य मोक्षांतं जपाद्दुपस्थाने पुरश्चरणं जायते॥ ग्रहणे र्कस्य वेदो वा शुचिः पूर्वमुपोषि

परद्दले रात्रेः पुराहर्द्दले॥

तः॥ ग्रहणादिविमो
तः॥ नद्यां समुद्रगामिन्यां नाभिमात्रे जले स्थितः॥ यथा पुण्योदके स्नात्वा शुचिः पूर्वमुपोषितः॥ ग्रहणादिविमो
क्षांतं जपेन्मंत्रं समाहितः॥ अनंतरं दशांशेन क्रमाद्धोमादिकं चरेत्॥ तदंते महतीं पूजां कुर्याद् ब्राह्मणभोज
नं॥ ततो मंत्रस्य सिद्ध्यर्थं दृष्यर्थं दशांशेन तोषयेत्॥ एवं च मंत्रसिद्धिः स्यादेवता च प्रसीदति॥ अथ वान्यः प्रकारो ॥
यं पोरश्चरणिको विधिः॥ चंद्रसूर्योपरागे च स्नात्वा प्रयतमानसः॥ ॥॥ठ॥ ॥

का॰सि॰टी॰ स्पर्शादिमोक्षपर्यंतं जपेन्मंत्रमाहितः। जपाद्दशांशतो होमं तथा होमाच्च तर्पणं। तर्पणस्य दशांशेन
मार्जनं कथितं किल। मार्जनस्य दशांशेन ब्राह्मणानथ भोजयेत्। जपोऽथ पूर्वको होमस्तर्पणं
२२५ चाभिषेचनं॥ द्विजभोजनं पंचप्रकारेश्च पुरश्चर्येति। तर्पणाभिषेकौ तु मूलमंत्रेण समुच्चार्य तद्
तद्देवतानिधौ। द्वितीयां नामहं पश्चाद्भिषिंचाम्यनेन च। तोयैरंजलिनाशुद्धैरभिषिंचेन मूर्द्धनि। एवं
कृत्वा तु मंत्रस्य जायते सिद्धिरुत्तमा। होमाशक्तो जपं कुर्याद्धोमसंख्याचतुर्गुणं। षड्गुणं चाष्टगुणितं य

यावत्त्रिप्रहरं तु जि॥ राम॰

थासंख्यं द्विजातयः। तेषां स्त्रीणां तु विज्ञेयस्तेषामेव समो जपः। एवं वर्णाश्रितः शूद्रस्तत्कल्पस्य
कीर्तितः॥ इति पुरश्चरणविधिः। ग्रहमंत्रदीक्षा गृह्यते। तद्यथा। सत्तीर्थेर्कविधोर्ग्रस्ते तंतुदामनप २२५
र्वयोः। मंत्रदीक्षां प्रकुर्वाणो मासर्क्षादीन्न शोधयेत्। चंद्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे सुरालये। मंत्रमा
त्रप्रकथनमुपदेशः स उच्यते॥ इति ग्रहणे वारविशेषेण चूडामणियोग उक्तः व्यासः। सूर्यवारे रवेर्ग्रासः
सोमो मग्रहस्तथा॥ ॥

चूडामणिरिति ख्यातस्तत्रानंतफलं लभेत्। वारे धन्ये बुधस्सुवर्णं ग्रहणे चंद्रसूर्ययोः। तत्सुवर्णं कोविगुणि
[illegible]न्डामणौ स्नानमिति। अथ मासविशेषे ग्रहणे तीर्थविशेषसंबंधे न फलजातिश्चाय उक्तो देवी
पुराणे॥ कार्त्तिके ग्रहणे श्रेष्ठे गंगायमुनसंगमे। मार्गे तु ग्रहणे पुण्यं देविकायां महामुने। पौषे तु नर्म
दा पुण्या माघे सन्निहिता सुता॥ फाल्गुने वरुणा पुण्या चैत्रे वसरस्वती। वैशाखे तु महापुण्या चंद्रभागा
सरिद्वरा। ज्येष्ठे तु कौशिकी पुण्या आषाढे तापिका नदी। श्रावणे सिंधुसंज्ञा तु भाद्रे पुण्या च गंडकी। आ

ग्रहणे काले तु नौकच्छूतः॥ ...मपि स्नानमुक्तं। उपाकर्मणि

स्नाने सरयु पुण्या नृपः पुण्या तु दर्मदेति। ग्रहणकाले न घोरं नस्वजलायामपि स्नानमुक्तं। उपाकर्मणि
चोत्सर्गे नस्नाने तथैव च। चंद्रसूर्यग्रहे चैव रजोदोषो न विद्यते। नदीरजोदर्शनकालः। मासद्वयं श्रा
श्रावणाद्ये सर्वा नद्यो रजस्वलाः। तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः। सिंहकर्कगते सूर्ये सिंधु
गान्धारनस्वजाः। सिंधुगाः समुद्रगाः याः शोषमुपगच्छति ग्रीष्मे कुसरितो तु वि॥ ॥ ॥२॥ ॥

का॰सि॰टी॰ तासुप्रावृषिनस्नायादृष्ट्वौदर्शावासरे।नृसिंहस्थानवोदकेप्येवं।कर्कटस्थेरवौगंगारेवाचंद्रनागागोम
तीसरयूश्चक्रमहेरजस्वलाः।अयनन्मरागौतन्मनेचग्रहणेचव्रतिसोप्येकवारंग्रहणेदृष्ट्वामन्त्रपुराणो
२२६ क्तविधिनास्नानादिकंकुर्यात्।पुनःपुनर्नपश्येत्।तद्यथा।यस्यराशिंसमासाद्यभवेद्ग्रहणसंभवः।त
स्यस्नानंप्रवक्ष्यामिमंत्रौषधिसमन्वितं।चंद्रोपरागंसंप्राप्यकृत्वाब्राह्मणवाचनं।सहस्रंचतुरोवि

शुद्धिस्तद्व्रततोनिषिद्ध॥ राम

प्राशुक्लमाल्यानुलेपनैः।सर्वमेवोपरागस्यसमानीयौषधादिकं।स्थापयेच्चतुरःकुंभानग्रतःसाग
राणिव।पंचगव्यंपंचरत्नंपंचत्वक्पंचपल्लवं।रोचनंपद्मकंशंखंकुंकुमंरक्तचंदनं।शुक्तिस्फटिकती २२६
र्थोबुसितसर्षपगुग्गुलं।देवदारुमधूकंचविष्णुक्रांताबरी।बलाचसहदेवीचनिशाद्वितयमेवच
॥गजाश्वरथवल्मीकसंगमाद्ध्रदगोकुलात्॥राजद्वारप्रदेशाच्चमृदमानीयनिक्षिपेत्॥ ॥ ॥

एतत्सर्वंविनिक्षिप्यकुंभेष्वावाहयेत्सुरान्॥सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः।आयांतुयजमानस्य
दुरितक्षयकारकाः।योसौवज्रधरोदेवआदित्यानांप्रभुर्मतः।सहस्रनयनश्चंद्रग्रहपीडांव्यपोहतु॥
मुखःसर्वदेवानांसप्तार्चिरमितद्युतिः॥चंद्रोपरागसंभूतामग्निःपीडांव्यपोहतु।यःकर्मसाक्षीलो
कानांधर्मोमहिषवाहनः।यमश्चंद्रोपरागोत्थांतत्रपीडांव्यपोहतु॥रक्षोगणाधिपःसाक्षान्नीलांजनस

समयेयोग्रासहूर्वैदिने॥

मप्रभः।खड्गहस्तोतिभीमश्चग्रहपीडांव्यपोहतु।नागपाशधरोदेवःसदामकरवाहनः।सजलाधि
पतिश्चंद्रग्रहपीडांव्यपोहतु।प्राणरूपोहिलोकानांसदाकृष्णमृगप्रियः।वायुश्चंद्रोपरागोत्थामपीडां
व्यपोहतु।योसौनिधिपतिर्देवःखड्गशूलगदाधरः।चंद्रोपरागकलुषंधनदोत्रव्यपोहतु।योसौचंद्रध
रोदेवःपिनाकीवृषवाहनः।चंद्रोपरागजंपापंविनाशयतुशंकरः॥

का·सि·टी· त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च॥ ब्रह्माविष्ण्वर्करुद्राश्च दहन्तु मम दुःकृतं।एवमावाहयेत्कु
म्भं मंत्रैरेभिश्च वारुणैः।एतानेव तत्र मंत्रान्स्वर्णपात्रे विलेखयेत्।ताम्रपत्रेथवा लिख्य नववस्त्रेत
१२७ थैव चाम्लकेय जमानस्य निरद्धुस्नेहद्विजोत्तमाः।कलशान्दशसंयुक्तान्नानारत्नोपशोभितान्।गृही
त्वा स्नपयेद्भद्रं तद्रूपीठोपरिस्थितं।सर्वौषधैरेवमंत्रैश्च यजमानं द्विजोत्तमः।अभिषेकं ततः कुर्यान्मंत्रै

प्रोपोष्यग्रमोक्षमध्यतउप

रम·

र्वारुणाख्यकैः।ततः शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः।आचार्यं वरयेत्पश्चात्स्वर्णपत्रं निवेदयेत्॥
आचार्यैर्दक्षिणां दद्याद्गोदाने च स्वशक्तितः।अनेकद्रव्यसहस्रजातदर्शनविशेषतः॥ पूजयेद्वस्त्रगो १२७
दानैर्ब्राह्मणानपि शक्तितः।गंधमाल्यैर्धूपदीपैः पूजयेदिष्टदेवतां।होमं चैव प्रकुर्वीत तत्तिलैराहुति
भिस्तथा निवत्रे ग्रहयोस वैब्राह्मणोप्येविशेषतः।दाने च शक्तितो दद्याद्दरिद्रे हात्म नो हितं॥ ॥

सूर्यग्रहे सूर्यनाम सर्वमंत्रेषु कीर्त्तयेत्।अनेन विधिना यस्तु ग्रहणे स्नानमाचरेत्।न तस्य ग्रहणाद्भो
षः कदाचिदपि जायते।अन्यच्च।स्वर्णेन वाथ पिष्टेन कृत्वा सर्पस्य चाकृतिं।ब्राह्मणाय ददेत्तस्य नरोणा
दिश्चन्द्रकृतः॥ सर्पस्य सर्पाकारस्य राहोः।मंडलाधिपदेवस्य मंत्रैर्मत्स्येन यादिभिः।होमं कुर्यात्प्रयत्ने
न नक्षत्रानानपेक्षुधा इति।मंडलानि तत्र नक्षत्रगणात्मकानि।तेषामधिपा अग्निवायुमहेन्द्रवरुणाख्

स्याने जपाक्रायते॥ १० २॥

स्तैर्देवतैः।मंडलानि यथा।पौष्णमघा विशाखा च पूर्वाषाढा च कृत्तिका।पूर्वाभाद्रपदा याम्यमाग्नेयं मंडलं
नसतपुनर्वस्यश्विनी चित्रा हस्तः स्वातिर्मृगस्तथा।उत्तराफल्गुनी चेति वायव्यं मंडले तथा।मित्रजरोहिणी
ज्येष्ठा धनिष्ठा श्रवणास्तथा।अभिजिदुत्तराषाढा माहेन्द्रे मंडले श्रुतं।मूलो पोस्य भ्राता श्लेषा पूर्वाषाढा च पु
ष्पने।आर्द्रा चत्रिविशोत्पाते वारुणं मंडले श्रुतं॥१०१॥ इति नक्षत्रग्रहयोगमतिस्नानविधिः॥ ॥ ॥

का॰सि॰टी॰ अथ प्रसंगादर्द्धोदयपर्व कथ्यते॥ ॥चेद्यदि पौषमाघयोरंतरामध्ये माघादि पौषांते दर्शोमावास्या श्रवणाक्षेपा
तोव्यतिपातः एतेषां मिलने योगस्त्वर्द्धोदयनामयोगः स्यात्। ममान्तारते॥ अमार्कपातश्रवणैर्युक्ता
१२८ चेत्पौषमाघयोः। अर्द्धोदयः स विज्ञेयः कोटिसूर्यग्रहैः समः इति। अयं योगो दिवसे एव वरः। यतकर्को दिवे
वयोगः शास्त्रोयं न तु रात्र्यां कदाचनेति। अथ नाद्रेमास्यसितेपक्षे षष्ठी हस्तेर्केसति कुजस्तोमवारश्चात्

दर्शार्कश्रवणाक्षेपातमिलनं चेत्पौषमाघांतरा स्यादर्द्धोदययोग एष
दिने कस्य वैकिकोटिग्रासमः। योगोयं दिवसे वरोथ कपिलाषष्ठीति नाद्रेसिते राम॰
हस्तेर्के कुजथातपातयुक्तिसार्कग्रासजात्याः पराः॥ १२०॥ ॥ ॥

तोहिपातो व्यतीपातः एतेषां युक्तयोगस्तत्र भवति सा कपिलाषष्ठीति नाम्ना भवति। साप्यर्कग्रासानां १२८
सूर्यपर्वणां शतानी तस्याः परा अन्यतमा भवति। नाद्रेमास्यसितेपक्षे नानुधिस्ते दिवाकरे। पाते कुजे च रोहिण्यां
साषष्ठी कपिलामता। दिवैव योगः शास्त्रोक्तः सूर्यपर्वशताधिका। योगोयं स्याद्यदा रात्रौ चेपाषष्ठीति साशस्तेति
स्मृत्यंतरात्॥१२०॥

अथ कृतादियुग॥ धर्मान्देवान्धर्मव— नाह॥ ॥सत्ययुगे कृतयुगे ध्यानमेव वरं। त्रिंचरयो त्रेतायां तप
स्तथा श्रेष्ठा। द्वापरे यज्ञो याग एव। प्राप्ते तुर्ये कलौ दानं दमादया अक्राः। तथा च वसिष्ठः। ध्यानं परं कृ
तयुगे त्रेतायां लिंगपूजनं। द्वापरे ध्ययने तिष्ये महादेवस्य कीर्त्तने विष्णुधर्मोत्तरे। ध्यानं परं कृतयुगे
त्रेतायां च तपः परं। द्वापरे तु तथा यज्ञः प्रतिष्ठा च कलौ युगे। बृहस्पतिः। तपोधर्मः कृतयुगे ज्ञानं त्रेता

॥ध्यानं सत्ययुगे तपस्त्रिचरणो यज्ञस्तथा द्वापरे॥ ॥
॥प्राप्ते दानदयादमाः क्रमतया केनाच्युते प्राप्यते॥

युगोस्मृते॥ द्वापरे चाध्वरः प्रोक्तस्तिष्ये दानेदयादमाः। अथ क्रमतया चतुर्णामपि युगानां इष्टदेवा
नाह। क्रमतया कृतादियुगेषु केनाच्युते ज्ञानं कश्वरन श्वजन्सुतश्च ईशाश्च केनाच्युते ज्ञानं॥
ब्रह्मसूर्यविष्णुरुद्रा न यजन्ते तु। तथ्यं च स्कांदे। ब्रह्मा कृतयुगे देवस्त्रेतायां भगवान्रविः॥ ॥ ॥

का॰सि॰टी॰ द्वापरे नवागान्विष्णुः कलौ देवो महेश्वर इति॥ अथैतेषु युगेषु धर्मस्य वक्तारः मनुगौतमौ। कृतत्रेता
युगयोः सलिखितः शंखः शंखलिखितौ द्वापरे॥ पाराशरः कलौ॥ एते धर्मप्रवक्तारः। तथा च पराशरः
२२९ ।कृते तु मानवो धर्मस्त्रेतायां गौतमः स्मृतः। द्वापरे शंखलिखितौ कलौ पाराशरः स्मृतः। च परं पातका
न्महापातककरणात् कृतादियुगेषु देशपत्तनकुलानि एकं पातकिं त्यजेत्। तथा च पराशरः॥

॥वक्तारो मनुगौतमौ सलिखितः शंखश्च पाराशरो॥ राम॰
॥धर्मस्यैषु च देशपत्तनकुलान्येकं त्यजेत्पातकात्॥२२२

त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत्॥ द्वापरे कुलमेकं तु कर्त्तारं तु कलौ त्यजेदिति तत्सं २२९
सर्गात्पातकी नवतिते नैषां त्यागः। तथा च तत्रैव॥ कृते संभाष्य पतति त्रेतायां स्पर्शनेन तु॥ द्वाप
रे त्वन्नमादाय कलौ कर्त्रैव लिप्यते॥॥ २२२॥

अथ कलिवर्ज्यो नाह॥ ॥ कलौ कलियुगे इत्यादीनि वर्जयेदिति प्रश्ने। कं से बध्यते॥ तानि मया॥ मद्यं मद्यपानं।
द्विजातीनां गोर्द्धं तु हयो अश्वो गोधो नर एतेषां मेधकरणं। गोमेधहयमेधनरमेधकरणं त्यजेदित्यर्थः॥ एक
वारं ऊढायाः पुनरुद्वाहं विवाहं वराविवाह्यः सुराविश्वैर्देवाः पित्रादयः अतिथिरस्मागतस्य दृष्टपशोर्गोर्वृष
स्यां तेनालंभं त्यजेत्। ज्येष्ठाद्यादेशात्सह तस्य भ्रातुः स्त्रियो देवरात्सुतजननिसंत्यजेदिति॥ निष्ठयावत्सत्रते

मद्यं गोहयगोधमेधकरणं ज्येष्ठांशकोद्धारयोः ऊढायाः पुनरुद्वहं व
रक्रातिथ्यपयेमं तेषघ्नीः॥ ज्यादेशात्सह तत्स्त्रियो सुतजनिश्चस्तव
नैनिष्ठयावानप्रस्थगतिं कमंडलुधृतिं तेषामपापमुद्धृतिं॥ २२२॥

नैष्ठिकब्रह्मचारित्वं। वानप्रस्थगतिं वानप्रस्थाश्रमगमनं। कमंडलुधृतिं कमंडलुधारणं॥ तेषां तु
वर्णेष्वधीनत्वघ्नतिरिक्तपापिनस्त्रयः ब्रह्महा सुरापो गुरुतल्पगामी तेषामुद्धृतिः प्रायश्चित्तेनोद्धारस्त्योत्स्य
जेत्॥२२२

का॰सि॰टी॰ श्रोत्रियादिगुणावत्त्वयाः घनिः कृतौ प्रायश्चित्तैः संकोचं स्यन्नतो ॥ युद्धेऽद्य नास्त्रोत्रादिव्रतस्तस्य प्रायोत्तेऽप्राया
नाशंअस्तुस्यः प्रोवोस्मोहेतुस्योदिजस्य पापनिः कृतिः ॥ द्विजस्यकारी वाग्निप्रवृत्तिभिः प्रायोत्तैः प्राय
१२० श्चित्तैः पापनिष्कृतिं स्यन्नेत ॥ विप्रस्य श्यामित्रकं श्यामितुः कर्म ॥ मातुर्वैश्यो सपिंडाज्ञायतेयाकान्यात॰

संकोचं गुणावत्त्वयाद्य निकृतौ युद्धोऽज प्रायोत्तेंद्विजया पनिः ॥ ॥
कृतिम सुस्यो ॥ विप्रश्यामित्रकं ॥ मातुर्वैश्यासपिंडज्ञा परिकांयही ॥ ॥ राम॰
नादृष्याल्लाहृतिं दत्तौरस्काः सुतान्यपालनमपिग्राह्यं च सौत्रामायो ॥ २२३ ॥

स्याः परिवार्यं विवाहं ॥ अथ हीनाकृनादल्लस्याहृतिं हीनवर्णा दल्लानयनेनादत्तः केन चिदाज्ञैरस्कर्जं १२०
रसस्तान्यामन्येपेमुताः क्रीतयालितलब्धादयस्तेषां पालनं स्वीकारं ॥ स्यन्नेदिति ॥ सौत्रामण्यां नाम
यज्ञे सुरायाः सुरायग्राह्य ग्रहं स्यन्नेदिति ॥ ॥ २२३ ॥

॥ सोमस्य यज्ञे सोमवल्याविक्रये च परे एतेषु प्रमाणं प्रमाणं स्यन्नेत ॥ केषु ॥ शाकुने मृगाविहंग
समसुत्ये ॥ सामुद्रिके सुलक्षणा प्रतिपादके ॥ उपश्रुतिः रत्नकालयोति गतकन्यादिश्रुतवा॰
क्यार्थः ॥ स्वप्नः स्वप्नावस्थायां दृष्टावस्कैत्यादिषु प्रमाप्रमाणं स्यन्नेत ॥ अथासवर्णाना॰

सोमस्य क्रययोप्रमांच शाकुने सामुद्रिको पश्रुतिः ॥
स्वप्नादिषु सवर्णा न्मोद्वह मथोविप्राध्विनो प्रस्थिति ॥

कन्यानस्याउद्वहंविवाहं ॥ अयोविप्रा ॥ ध्विनो प्रस्थिति ॥ विप्रस्याध्वो नावा प्रस्थितिं प्रस्थानं ॥

का॰सि॰टी॰ महत्प्रस्थाने। हिममार्गेणामेरुगमनं महाप्रस्थानं स्यंजेत्। केदारकल्पोक्तघोरमेत्रस्यापि सिद्धेरिति॥ अग्निहोत्रस्य
हवणालेह आस्वादनं तस्या लीढाया अग्रहे ग्रहणं स्यादिति निस्यजेदिति श्रुत्यैवमाम्नाते। तथा चादित्यपुराणे। दी
१२१ र्घकालं ब्रह्मचर्यधारणं च कमंडलोः। गोत्रान्मातुः सपिंडाच्च विवाहे गोवधस्तथा। नराश्वमेधौ मद्यं च कलौ
वर्ज्यं द्विजातिभिः। ऊढायाः पुनरुद्वाहो ज्येष्ठांशो गोद्धारएव च। स्मृत्यंतरे॥ विधवायां सुतोत्पत्तौ देवरस्य नि
योजनं। बालायाः क्षतयोन्यास्तु वरेणान्येन संस्कृतिः। कन्यानामसवर्णानां विवाहश्च द्विजातिभिः। आ राम॰

प्रस्थानेमहदग्निहोत्रहवणीलेह्यावलीढग्रहः॥

त्तायिद्विजाग्र्याणां धर्मयुद्धेन हिंसनं। द्विजस्याब्धौ तु नौयातुः शोधितस्यापि संग्रहः। सत्रदीक्षा च सर्वेषां क
मंडलुविधारणं। महाप्रस्थानगमनं गोसंज्ञप्तिश्च गोसवे। सौत्रामण्यामपि सुराग्रहणस्य च संग्रहः। अ
ग्निहोत्रहवण्याश्च लेहो लीढापरिग्रहः। वानप्रस्थाश्रमस्यापि प्रवेशो विधिचोदितः। वृत्तस्वाध्यायसापेक्ष २१
मघसंकोचनं तथा। प्रायश्चित्तविधानं च विप्राणां मरणान्तिकं। संसर्गदोषस्तेयान्तो महापातकनिष्कृ
तिः। वरातिथिपितृभ्यश्च पशूपाकरणक्रिया। दत्तौरसेतरेषां च पुत्रत्वेन परिग्रहः॥

असवर्णाग्न्यागनादुष्टैः संसर्गः शोधितैरपि। अयोनौ संग्रहे वृत्ते परित्यागो गुरुस्त्रियाः। परोद्देशात्मसंत्या
गश्च द्विष्टस्यापि वर्जनं। प्रतिमास्पर्शनार्थाय सकल्पेश्च सधर्मकः। अस्थिसंचयनादूर्ध्वमंगस्पर्शनमेव
च। शामित्रे चैव विप्राणां सोमविक्रयणं तथा। षड्भक्तानशने चान्नहरणं हीनकर्मणः। एतानि लोकगुप्स
र्थं कलेरादौ महात्मभिः। निवर्तितानि विद्वद्भिर्व्यवस्थापूर्वकं बुधैः। समयश्चापि साधूनां प्रमाणं वेदवद्भवेत
दिति। आदित्यपुराणे। आपद्यः आकुनः स्वप्नः सामुद्रिकमुपश्रुतिः। उपयाचितमादेशाः संतवति कलौक्त

॥ वित्यादीनि कलौत्पन्ने दयहरेराख्यागुणान्कीर्तयेत्॥२५॥

चित्। तस्मात्कर्मात्रज्ञानेन कलौ कार्यं न कारयेदिति। एवं कलिवर्ज्यान्युक्त्वैतानि कर्तृत्वमादिशति। अथ हरेर्वि
क्षीराख्यानामानि गुणानुगानि द्र मोक्षदायीनि कीर्तयेदिति तात्पर्यार्थः। तथा चोक्तं विश्वामित्रेण। रामेति वर्णा
द्वयमादरेण सदा स्मरन्मुक्तिमुपैति जंतुः। कलौ युगे किल्बिषमानुषाणामन्यत्र धर्मे खलु नाधिकार इति। एवमो
पि। आलोच्य सर्वशास्त्राणि विचार्य च पुनः पुनः। एकएवार्थः सन्तोऽध्येयो नारायणः सदा॥२६॥ इति कलिधर्मा
स्याऽध्यायः॥

का.सि.टी. अथ ग्रंथकर्त्ता स्वात्मानमुपदिशति ॥ ॥ श्रीमत्सिंहपुरस्य लोकप्रसिद्धश्रीसिंहोरपुरस्यांतिके समीपे वेलावटा
ख्ये पुरे लोकप्रसिद्धवेलावटपुरे दिनिगमी द्विवेदी वैकुंठनामा द्विजोऽभवत्। किंलक्षणः। श्रौतस्मार्त्तवि
२२२ धानश्रौतमग्निहोत्रादि स्मार्त्तमावसथ्यादि तयोर्विधानमाचरतीति तस्य सारस्वति कर्त्तव्यंतात तत्र चतुरः

॥ श्रीमत्सिंहपुरांतिके दिनिगमी वेलावटाख्ये पुरे श्रौतस्मार्त्तविधान ॥ राम.
॥ सारचतुरो वैकुंठनामाभवत् ॥ तस्मात्तुर्जयरामज्ञा ह्युदितः श्री ॥
॥ रामनामापरस्तत्सृष्टे हरिरामस्त्वभिधया ब्रह्मेशविष्णूपमाः ॥२२५॥

कृष्णतः। तस्य द्विवेदी वैकुंठनाम्नः आद्यः सुतो जयराम इत्यभिधया नाम्नोदितः समुद्भूतः। तस्य रः श्री २२२
रामनाम्नोदितः॥ तत्सृष्टे हरिराम इत्यभिधया नाम्नोदितः। एते त्रयः पुत्राः ब्रह्मेशविष्णूपमा उदिताः॥ ब्र
ह्मा च ईशश्च विष्णुश्च तैरुपमीयंत इति ब्रह्मेशविष्णूपमाः ॥ २२५॥ ॥ग्रं॥ ॥

तत्र त्रिषु पुरेषु श्रीजयरामनाम्नेन श्रीजयरामसुतेन रघुरामेणाख्यया बुद्ध्याऽनेकनिबंधकान्माध
वकालतत्वविवेकादिनिबंधान् ज्ञात्वा सम्यग्विचार्यायं प्रकृष्टग्रंथो लिखितः॥ तत्सर्वे दृष्ट्वावि

॥ तत्र श्रीजयरामजेन रघुरामेणात्र बुद्ध्याख्यया ॥
॥ ज्ञात्वाऽनेकनिबंधकान् विलिखितं निश्चित्य प्रकृष्टतः ॥
॥ तद्दृष्ट्वा गिरिनारराजमहितः श्रीकालजित्सत्सुतो ॥ ॥
॥ वृत्तैस्तर्कहरोऽग्निभैर्व्यरचयद्ग्रंथं महादेववित् ॥२२६॥

तोऽस्य श्रीगिरिनारो रैवताचलः तस्य राजा तेन महितः पूजितः श्रीकालजिद्वाडवः तस्य सुतो र
महादेववित्तर्कहरोऽग्निभैर्वृत्तैः षोडशोत्तरशतैरिमं ग्रंथं व्यरचयदिति ॥ २२६॥ ॥ ॥

का॰ सि॰ टी॰ स्वस्ति श्रीमन्नृपविक्रमात् नववियन्नगेंदु॥ १७०९॥ संख्येऽब्दके वर्षे मार्गशीर्षे मासि सितद-
लेऽशुक्लपक्षे स्मरतिथौ त्रयोदश्यां गोर्वासरे कृत्तिकानक्षत्रे साध्ये युति साध्ययोगे तैत

२२३

॥स्वस्तिश्रीनृपविक्रमान्नववियन्नगेंदुसंख्येऽब्दके॥
॥मार्गे मासि सिते दले स्मरतिथौ वारे नगोर्वह्निने॥॥ राम॰
॥साध्ये युत्यथ तैतलाख्यकरणे श्रीमज्जुनाख्ये पुरे॥
॥टीकार्थं रघुरामकृष्णमकरोद्ग्रंथं महादेववित्॥ २२७

२२३

लाख्यकरणे एवं पंचांगे श्रीमज्जुनाभिधे पुरे रघुरामेणाकृष्ण रचितमर्थं विलोक्य महादे-
वित् ग्रंथमकरोत् लिखच्च॥ ५ २२७॥ ॥ ॥ ॥ ॥ ॥

अथ टीकालिखनसमये व्याख्यातारघुमुपवदंति॥ २२७॥ एतादृशे समये जुन्नेनगरे द्वि-
वेदि जयरामजेन रघुरामेण ग्रंथस्यैव व्याख्या॥ बुद्ध्यामनीषयाकृतेमि॥ २२८॥ ॥

॥शाके विक्रमनृपतेर्गगननन्दसप्तेंदुसंख्येयने॥
॥सौम्ये माधवमासि उज्ज्वलदलन्तानोत्तिथौ पुष्यने॥
॥जीवावारे शुभयोगनाम्नि करणे बवे तु जनेपत्तने॥॥
॥व्याख्यायै जयरामजेन रघुणा ग्रंथस्य बुद्ध्या कृता॥ २२८

॥ इति द्विवेद्यग्निहोत्रिश्रीजयरामसुतरघुरामविरचितो निर्णयसिद्धान्तः सटीकः समाप्ति-
मगमत्॥ ॥ ॥ समाप्तोयं ग्रंथः॥ ॥ श्रीशुभं भवतु॥ ॥कल्याणमस्तु॥ ॥

का॰ सि॰ टी॰

राम

२२४

॥ ॥इतिश्रीकालनिर्णयसिद्धांतसटीकसमाप्तः॥पत्र२२४॥

२२४